"त मब्रवीत् महान् देवोऽसीतीति *। "प्रजापतिर्वै चन्द्रमा इति। चन्द्रमा मनसो जात, मनश्च प्रजापतिदेवत्वम्, तत: कार्यकारणयोरभेदोपचारादेव मुक्तम्। प्रजापतेर्महादेववाच्यत्व सर्वलोकस्रष्टृत्वात् ॥ १६ ॥

"त मब्रवीदीशानोऽसीतीति †। आदित्यस्य ईशानशब्दवाच्यत्व माह— "आदित्यो ह्यस्य सर्वस्येति। इष्ट इतीशान।

पूर्वं मग्निना "धेह्येव मे नाम"–इति ‡ प्रार्थित एव प्रजापतिरस्याष्टौ नामानि व्यदधात्, अत पर मग्नि स्वय मेव एतैर्नामभि स्वकीयगुणस्य कार्त्स्न्येन प्रतिपादितत्वाभिप्रायेण नामान्तरकरण निषेधति— "सोऽब्रवीदेतान्वा अस्मीति। "मा मेत परो नाम धा इति। 'इत' एभ्योऽष्टभ्यो नामभ्य 'पर' परस्तात् 'नाम' 'मा धा' मा कुरु 'इति' ॥ १७ ॥

"तान्येतान्यष्टावग्निरूपाणीति। "कुमारो नवम इति। रुद्रादीन्यष्टौ नामानि, रेतोनामवाच्य 'कुमारो नवम' नवसङ्ख्यापूरक इत्यर्थ। उक्ता नवसङ्ख्या त्रिवृदात्मना प्रशसति— "सैवाग्नेस्त्रिवृत्तेति। 'सा' पूर्वं मुक्ता नवमसङ्ख्यैव 'अग्ने' 'त्रिवृत्ता' त्रिवृत्त नाम। उक्तरीत्या अग्नेर्नवधा विभेद। उत्तरत्र "त्रिवृदग्नि"–इति व्यवहरिष्यते, तत्र सर्वत्र उक्तनवसङ्ख्यावत्त्वेन त्रिवृत्त्व सम्पन्न मिति मन्तव्यम् ॥ १८ ॥

नामगता मष्टसङ्ख्या गायत्र्यात्मना प्रशसति— "यद्वेवाष्टावग्निरूपाणीति। अतोऽष्टनामवाच्यरूपाष्टकोपेतत्वादग्नेरपि गाय-

---

* "महादेव."—इत्यादि अथ० स० १५ ५ १३, १२।

† "ईशान"—इत्यादि अथ० स० १५ ५ १५, १४।

‡ इहैव पुरस्तात् १० क० (४१ पृ० ८ प०) द्रष्टव्यम्।

तत्त्व सम्यक मित्यर्थ । "सोऽय कुमारो रूपाणीति । 'कुमार' अग्नि स्वनामभि रुद्रसर्वादिभिरष्टभि प्रतिपाद्यानि, अग्न्युदकौषध्यादीनि अष्टौ रूपाणि अनुप्रविष्टवान् । स कुमारोऽग्नि तत्तद्रूपेभ्य पृथग्भूतो न दृश्यत इति तात्पर्यम् ॥ १८ ॥

अथ सवत्सरपर्यन्त मुख्याग्निधारण कर्त्तव्य मिति दर्शयितु माह— "त मेतं संवत्सर एव चिनुयादित्यादि । 'सवत्सर एव' संवत्सरपर्यन्त स्थित्वेत्यर्थ । प्रसङ्गात् कञ्चिद्धर्म दर्शयति— "सवत्सरेऽनुब्रूयादिति । वर्षपर्यन्त गुरुसन्निधौ स्थित्वा अधीयत इति । "संवत्सरवासिने प्रब्रूयात्"–इत्यैतरेयकम् * । तत्र पक्षान्तर दर्शयति— "द्वयोरित्यु हैक आहुरिति । केचित् सवत्सरपर्यन्त मुख्य मग्नि धारयित्वा, तत सवत्सरे चयन कर्त्तव्य मित्याहु †, अनुवचनञ्च तथा करणीय मिति वदन्ति । तत्रोपपत्ति दर्शयति— "सवत्सरे वैतद्रेत इति । पूर्व-'सवत्सरे' 'रेतोऽसिञ्चन्', 'स सवत्सरे कुमारोऽजायत' इति रेतस्सेकस्यैको वत्सर, कुमारोत्पत्तावेक इति वर्षद्वयस्य समाम्नातत्वादिति । प्रथम पक्ष सहेतुक सिद्धान्तयति— "सवत्सरे त्वेव चिनुयादिति । 'तु' शब्दो वर्षद्वयपक्षनिवृत्त्यर्थ । रेतस्सेकानन्तर मेव कललबुद्बुदपिण्डादिक्रमेण वर्षात् प्रागेव कुमारोत्पत्तेरित्यर्थ ‡ ।

---

* "नानन्तेवासिने प्रब्रूयात, नासवत्सरवासिने, नो एवासवत्सरवासिने, नाब्रह्मचारिणे, नासब्रह्मचारिणे, नो एवासब्रह्मचारिणे, नानभिप्रायाय"—इत्यादि ऐ० आ० ५ ३ ३ ब्रा० ४ ।

† एतदेव पुरस्तादुक्तं भाष्ये 'वक्ष्यते'—इति (४४ पृ० ५ प०) ।

‡ "शुक्रशोणितसयोगात्मातृपितृसयोगाच्च तत कथ मिदं शरीर

"तस्य चितस्य नामेति। चयनसम्बन्धाच्चित्रनाम सम्पन्न मिति तात्पर्यम्। चित्रत्व मग्नेरुपपादयति— "सर्वाणि हि चित्राण्यग्निरिति। अग्न्युदकौषध्यादीना रूपाणां मग्न्यात्मकत्वात तस्य चित्रत्व मिति। किञ्च यद्यत् चित्रवर्णं तत्तत् सर्वं मग्निरेव, शुक्लभास्वररूपत्वात् तस्येति ॥ २० ॥ ३ ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
षष्ठकाण्डे प्रथमेऽध्याये तृतीयं ब्राह्मणम् ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वर ॥ १ ॥

ब्रह्माण्ड गोसहस्र कनकहयतुलापूरुषौ स्वर्णगर्भम्,
सप्ताब्धीन् पञ्चसीरीस्त्रिदशतरुलताधेनुसौवर्णभूमी ।
रत्नोस्रा रुक्मवाजिद्विपसहितरथौ सायणि सिङ्गणार्यौ,
व्यश्राणीद्विश्वचक्र प्रथितविधिमहाभूतयुक्तं घटञ्च ॥

पर सयम्यते? सौम्यो भवति एकरात्रोषित कलल भवति, पञ्चरात्राद् बुद्बुदा, सप्तरात्रात पेशी, द्विसप्तरात्रादर्बुद, पञ्चविंशतिरात्र स्वस्थितो घनो भवति, मासमात्रात कठिनो भवति, द्विमासाभ्यन्तरे शिर सम्पद्यते, मासत्रयेण ग्रीवाव्यादेशो, मासचतुष्केण त्वग्व्यादेश, पञ्चमे मासे नखरोमव्यादेश षष्ठे मुखनासिकाचिश्रोत्रं च सम्भवति, सप्तमे चलनसमर्थो भवति, अष्टमे बुद्ध्याध्यवस्यति, नवमे सर्वाङ्गसम्पूर्णो भवति, •—•, दशमे मासे प्रजायते"—इत्यादि निरु० १४ ६ ।

धान्याद्रिं धन्यजन्मा तिलभव मतुलं स्वर्णजं वर्णमुख्यं,
कार्पासीयं कृपावान् गुडकृत मजडो राजतं राजपूज्यः ।
आज्योत्थं प्राज्यजन्मा लवणज मनृणः शार्करं चार्क्कतेजा,
रत्नाढ्यो रत्नरूपं गिरि मकृत मुदा पात्रसाक्षिण्णुणार्यं * ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीहरिहरमहाराजसाम्राज्यधुरन्धरेण
सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
षष्ठकाण्डे प्रथमोऽध्यायः समाप्तः ॥ १ ॥

---

* अन्यत्र टीप्पण्यो पञ्चमकाण्डीयद्वितीयाध्यायान्ते द्रष्टव्याः ।

(अथ द्वितीयाध्याये प्रथमं ब्राह्मणम्)

प्रजापतिरग्निरूपाण्यभ्यध्यायत्। स योऽयं कुमारो रूपाण्यनुप्रविष्ट आसीत्तमन्वैच्छत् सोऽग्निरवेदनु वै मा पिता प्रजापतिरिच्छति हन्त तद्रूप मसानि यन्म ऽएष न वेदेति ॥ १ ॥

स एतान् पञ्च पशूनपश्यत्। पुरुष मश्वं गा म वि मज यदपश्यत्तस्मादेते पशवः ॥ २ ॥

स एतान् पञ्च पशून् प्राविशत्। स एते पञ्च पशवोऽभवत्तमु वै प्रजापतिरन्वेवैच्छत् ॥ ३ ॥

स एतान् पञ्च पशूनपश्यत्। यदपश्यत्तस्मा-देते पशवस्तेष्वेत मपश्यत्तस्मादेवैते पशवः ॥ ४ ॥

स ऐक्षत। इमे वा ऽअग्निरिमानेवात्मान मभिसंस्करवै यथा वा ऽअग्निः समिद्धो दीप्यत ऽएव मेषां चक्षुर्दीप्यते यथाग्नेर्धूम उदयत ऽएव मेषा मूष्मोदयते यथाग्निरभ्याहितं दहत्येव बप्स-ति यथाग्नेर्भस्म सीदत्येव मेषां पुरीषं सीद-तीमे वा ऽअग्निरिमानेवात्मान मभिसंस्करवा

ऽइति तान्नाना देवताभ्य आलिप्सत वैश्वकर्मणं पुरुषं वारुण मश्व मैन्द्र मृषभं त्वाष्ट्र मवि माग्नेय मजꣳ * ॥ ५ ॥

स ऐक्षत । नाना वा ऽइदं देवताभ्य आलिप्सेऽग्नेर्व्वाहꣳ रूपाणि कामये हन्तैनानग्निभ्य. कामायालभा ऽइति तानग्निभ्य. कामायालभत तद्यदग्निभ्य इति बहूनि ह्यग्निरूपाण्यभ्यध्यायदथ यत् कामायेति कामेन ह्यालभत तानाप्रीतान् पर्यग्निकृतानुदीचो नीत्वा समज्ञपयत् ॥ ६ ॥

स ऐक्षत । या वै शीरभ्यधासिष मिमास्ताः शीर्षसु हन्त शीर्षाण्येवोपदधा ऽइति स शीर्षाण्येवोत्कृत्योपादधत्ताथेतराणि कुसिन्धान्यप्सु प्राप्लावयदजेन यज्ञꣳ समस्थापयन्नेन्मे यज्ञो विकृष्टो ऽसदित्यात्मा वै यज्ञो नेन्मेऽय मात्मा विकृष्टो ऽसदित्येतेन पशुनेष्ट्वा तत् प्रजापतिरपश्यद् यथैतस्याग्नेरन्तं न पर्य्यैत् † ॥ ७ ॥

* 'माग्नेयमजꣳ'—इति क । 'माग्नेयमजꣳ'—इति ग, ब ।

† 'पर्य्यैत'—इति ग ।

स ऐक्षत । य मिम मात्मान मप्सु प्रापिप्लव त मन्विच्छानीति त मन्वैच्छत्तद्यदेषा मप्सु प्रविन्दाना प्रत्यतिष्ठत्ता अप समभरदथ यदस्या तां मृद तदुभयꣳ सम्भृत्य मृदं चापश्चेष्टका मकरोत्तस्मादेतदुभय मिष्टका भवति मृच्चापश्च ॥ ८ ॥

स ऐक्षत । यदि वा ऽइद मित्थ मेव सदात्मान मभिसंस्करिष्ये मर्त्यं कुणपोऽनपहतपाप्मा भविष्यामि हन्तैतदग्निना पचानीति तदग्निनापचत्तदेनदमृत मकरोदेतद्वै हविरमृत भवति* यदग्निना पचन्ति तस्मादग्निनेष्टका पचन्त्यमृता एवैनास्तत् कुर्व्वन्ति ॥ ९ ॥

तद्यदिष्ट्वा पशुनापश्यत् । तस्मादिष्टकास्तस्मादिष्ट्वैव पशुनेष्टका कुर्यादनिष्टका ह ता भवन्ति या पुरा पशो कुर्व्वन्त्यथो ह तदन्यदेव† ॥ १० ॥

तद्यास्ताः श्रियः । एतानि तानि पशुशीर्षाण्यथ यानि तानि कुसिन्धान्येतास्ताः पञ्च चितय-

* 'भवति'—इति ग, घ ।

† 'तदन्यदेव'—इति ग ।

स्तद्यत् पशुशीर्षाण्युपधाय चितीश्चिनोत्येतैरेव तच्छीर्षभिरेतानि कुसिम्बानि सन्दधाति ॥ ११ ॥

त ऽएते सर्व्वे पशवो यदग्निः* । तस्मादग्नौ पशवो रमन्ते पशुभिरेव तत् पशवो रमन्ते तस्माद्यस्य पशवो भवन्ति तस्मिन्नग्निराधीयते ऽग्निर्ह्येष यत् पशवस्ततो वै प्रजापतिरग्निरभवत् ॥ १२ ॥

तद्धैक ऽआहुः । अत्रैवैतैः सर्व्वैः पशुभिर्यजेत यद्वा ऽएतैरत्र सर्व्वैः प्रजापतिरयक्ष्यत तद्देवाग्नेरन्तं पर्य्यैष्यत्तद्यदेतैरत्र सर्व्वैर्यजेत तद्देवाग्नेरन्तं परीयादिति न तथा कुर्याद् देवानां तद्दितादियादथो पथस्तदियादथो कि ततः सम्भरेदेतानि वा ऽएतत् कुसिम्बान्येताश्चितीः सम्भरति तस्मात्तथा न कुर्यात् ॥ १३ ॥

यद्वेवैतान् पशूनालभते । आयतनमेवैतदग्नये करोति न ह्यनायतने कश्चन रमते ऽन्नं वा ऽआयतनं तदेतत् पुरस्तान्निदधाति तदेनं पश्यन्नग्निरुपावर्त्तते ॥ १४ ॥

* 'यदग्नि'—इति ग

पुरुषोऽश्वो गौरविरजो भवन्ति। एतावन्तो वै सर्व्वे पशवोऽन्नं पशवस्तद्यावदन्नं तदेतत् पुरस्तान्निदधाति तदेनं पश्यन्नग्निरुपावर्त्तते ॥ १५ ॥

पञ्च भवन्ति। पञ्च ह्येतेऽग्नयो यदेताश्चितयस्तेभ्य एतत् पञ्चायतनानि निदधाति तदेन पश्यन्नग्निरुपावर्त्तते ॥ १६ ॥

तद्यदग्निभ्य इति*। बहवो ह्येतेऽग्नयो यदेताश्चितयोऽथ यत् कामायेति यथा त काम माप्नुयाद्यजमानो यत् काम एतत् कर्म कुरुते ॥ १७ ॥

पुरुषं प्रथम मालभते। पुरुषो हि प्रथमः पशूना मथाश्व पुरुषꣳ ह्यन्वश्वो†ऽथ गा मश्वꣳ ह्यनु गौरथावि गाꣳ ह्यन्वविरथाज‡ मविꣳ ह्यन्वजस्तदेनान्यथापूर्व्वं यथाश्रेष्ठ मालभते ॥ १८ ॥

तेषा व्विषमा रशना स्यु। पुरुषस्य व्वर्षिष्ठाथ ह्रसीयस्यथ ह्रसीयसी तद्यथारूपं पशूनाꣳ रशनाः करोत्यपापवस्यसाय सर्व्वास्त्वेव समाः स्युः

* 'इति'—इति क।

† 'ह्यन्वश्वो'—इति क।

‡ 'ह्यन्वविरथाज'—इति ख।

सर्व्वाः सदृश्यः सर्व्वे ह्येते समाः सर्व्वे सदृशा* अनयो ह्युच्यन्ते † ऽन्नं ह्युच्यन्ते तेन समास्तेन सदृशा ॥ १९ ॥

तदाहुः । कथ मस्यैषोऽग्निः पञ्चेष्टकः सर्व्वः पशुष्वारब्धो भवतीति पुरोडाशकपालेषु त्वेवाप्यत ऽइय प्रथमा मृन्मयीष्टकाथ यत्पशु मालभते तेन पश्विष्टकाप्यतेऽथ यद्दपा मभितो हिरण्यशकलौ भवतस्तेन हिरण्येष्टकाप्यतेऽथ यद्दिध्मो यूपः परिधयस्तेन वानस्पत्येष्टकाप्यतेऽथ यदाज्य प्रो क्षण्यः पुरोडाशस्तेनान्नं पञ्चमीष्टकाप्यत ऽएव मु हास्यैषोऽग्निः पञ्चेष्टकः सर्व्वः पशुष्वारब्धो भवति ॥ २० ॥

तेषा चतुर्व्विंᳬशतिः सामिधेन्यः । चतु-र्व्विंᳬशत्यर्द्धमासो वै संव्वत्सरः सव्वत्सरो अग्नि‡-र्यावानग्निर्यावत्यस्य मात्रा तावतैवैन मेतत् समिन्द्धे ॥ २१ ॥

* 'सदृशा'—इति क, ख, ङ ।

† ह्युच्यन्ते'—इति क ।

‡ 'सं व्वत्सरोऽग्नि'—इति ग ।

यद्वेव चतुर्व्विᳯंशतिः * । चतुर्व्विᳯंशत्यक्षरा वै गायत्री गायत्रोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैन मेतत् समिन्द्धे ॥ २२ ॥

यद्वेव चतुर्व्विᳯंशतिः । चतुर्व्विᳯंशो वै पुरुषो दश हस्त्या अङ्गुलयो दश पाद्याश्चत्वार्यङ्गानि पुरुषः प्रजापतिः प्रजापतिरग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैन मेतत् समिन्द्धे ॥ २३ ॥

उभयीर्गायत्रीश्च त्रिष्टुभश्चान्वाह । प्राणो गायत्र्यात्मा त्रिष्टुप् प्राण मेवास्य गायत्रीभिः समिन्द्ध ऽआत्मान त्रिष्टुब्भिर्मध्ये त्रिष्टुभो भवन्त्यभितो गायत्र्या मध्ये ह्यय मात्माभितः प्राणा भूयसीः पुरस्ताद्गायत्रीरन्वाह कनीयसीरुपरिष्टाद्भूयाᳯंसो ह्रीमे पुरस्तात् प्राणाः कनीयाᳯंस उपरिष्टात् ॥ २४ ॥

सोऽन्वाह । समास्त्वाग्न ऽऋतवो वर्द्धयन्त्विति प्रजापति व्विस्रस्त यत्राग्निः समदधात्त मब्रवीद्या मत्सम्भृता सामिधेन्यस्ताभिर्मा समिन्त्स्वेति ॥ २५ ॥

* 'चतुर्व्विᳯंशतिः'—इति क, ग, घ, ङ

स एता अपश्यत्। समास्त्वाग्न ऋतवो वर्द्धयन्त्विति समाश्च त्वाग्न ऋतवश्च वर्द्धयन्त्वित्येतत् संवत्सरा ऋषयो यानि सत्येति सम्वत्सराश्च त्वऽर्षयश्च सत्यानि च वर्द्धयन्त्वित्येतत् स दिव्येन दीदिहि रोचनेनेत्यसौ वा ऽआदित्यो दिव्यꣳ रोचनं तेन सन्दीदिहीत्येतद्विश्वा आभाहि प्रदिशश्चतस्र इति सर्वा आभाहि प्रदिशश्चतस्र इत्येतत् * ॥ २६ ॥

ता एता एकव्याख्यानाः। एत मेवाभि यथेत मेव संस्कुर्यादेतꣳ सन्दध्यादेत अनयेता आग्नेय्य' प्राजापत्या यदग्निरपश्यत्तेनाग्नेय्यो यत्प्रजापतिꣳ समैन्द्ध तेन प्राजापत्या. † ॥ २७ ॥

द्वादशाप्रिय'। द्वादश मासा' संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैन मेतदाप्रीणाति ॥ २८ ॥

यदेव द्वादश। द्वादशाक्षरा वै जगतीयं वै

* 'इत्येतत्'—इति ग। 'इत्येतत'—इति घ।

† 'प्राजापत्या.'—इति ग, 'प्राजापत्या'—इति घ

जगत्यश्वाऽ हीदऽ सर्व्वं जगदिय मु वा ऽअग्नि-रत्रै हि सर्व्वो ऽग्निश्चीयत यावानग्निर्यावत्यस्य मात्रा तावतैवैन मेतदाप्रीणाति ॥ २९ ॥

यद्देव द्वादश। द्वादशाक्षरा वै जगती जगती सर्व्वाणि छन्दाऽसि सर्व्वाणि छन्दाऽसि प्रजा-पतिः प्रजापतिरग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैन मेतदाप्रीणाति ॥ ३० ॥

ता एता ऊर्द्धा अस्य समिधो भवन्तीति। प्रजापति र्व्विस्रस्त ग्रन्नाग्निः समदधात्त मब्रवीत्या मत्समिता आप्रियस्ताभि र्माप्रीणीहीति ॥ ३१ ॥

स एता अपश्यत्। ऊर्द्धा अस्य समिधो भवन्तीत्यूर्द्धा ह्येतस्य समिधस्य समिधो भव-न्त्यूर्द्धा शुक्रा शोचीऽष्यग्नेरित्यूर्ध्वानि ह्येतस्य शुक्राणि शोचीऽष्यर्चीऽषि भवन्ति द्युमत्तमेति वीर्य्यवत्तमेत्येतत् सुप्रतीकस्येति सर्व्वतो वा ऽअग्निः सुप्रतीकः सूनोरिति यदेन जनयति तेनास्यैष सूनुः * ॥ ३२ ॥

---

* 'सूनु'—इति ग, घ।

ता एता एकव्याख्यानाः । एत मेवाभि यथैत मेव सम्कुर्यादेतᳪ सन्दध्यादेत जनयेत्ता आग्नेय्य प्राजापत्या यदग्निरपश्यत्तेनाग्नेय्यो यत् प्रजापति माप्रीणात्तेन प्राजापत्याः * ॥ ३३ ॥

ता व्विषमा व्विषमपदाः । व्विषमाक्षरा व्विषमाणि हि छन्दाᳪस्यथो † यान्यस्याध्यात्म मङ्गाणि व्विषमाणि तान्यस्यैताभिराप्रीणाति ॥ ३४ ॥

व्वैश्वानरः पशुपुरोडाश । व्वैश्वानरो वै सर्व्वेऽग्नय सर्व्वेषा मग्नीना मुपाप्त्यै ॥ ३५ ॥

यद्वेव व्वैश्वानरः । ऋतवो ‡ हैते यदेताश्चि-तयोऽग्नयो वा ऽऋतव ऋतवः सव्वत्सर सव्व-त्सरो व्वैश्वानरो यदग्नय इति स्यादिति तद्रे-चयेद् द्वादशकपालो द्वादश मासाः सव्वत्सरः सᳪव्वत्सरो व्वैश्वानर आग्नेय्यो याज्यानुवाक्या अग्निरूपाणा मुपाप्त्यै कामवत्यः कामाना मुपाप्त्यै ३६ ॥

* 'प्राजापत्या '—इति ग

† '०स्यतो' —इति क ।

‡ 'ऋतयो'—इति क ।

तद्धैके । कृत्यैवैतानि पशुशीर्षाणि विकृत्वो-पदधत्युभयेनैते पशव इति ते ह ते मर्त्याः कुणपाः सम्भवन्त्यनाप्रीतानि हि तानि तद्ध तथा-षाढेः सौग्रामतेयश्चोपदधुः स ह क्षिप्र ऽएव ततो ममार ॥ ३७ ॥

हिरण्मयान्यु हैके कुर्व्वन्ति । अमृतेष्टका* इति वदन्तस्ता ह ता अनृतेष्टका न हि तानि पशुशीर्षाणि ॥ ३८ ॥

मृन्मयान्यु हैके कुर्व्वन्ति । उत्सन्ना † वा ऽएते पशवो यद्वै किञ्चोत्सन्नमियं तस्य सर्व्वस्य प्रतिष्ठा तद्यच्चैते पशवो गतास्तत एनानधि सम्भराम इति न तथा कुर्याद्यो वा ऽएतेषा मावृत च ब्राह्मणं च न विद्यात्तस्यैत ऽउत्सन्नाः स्युः स एतानेव पञ्च पशूनालभेत यावदस्य वशः स्यात्ताऽन्हैतान् प्रजापतिः प्रथम आलेभे श्यापर्णः सायकायनो ‡ ऽन्तमोऽथ ह्येतानेवान्तरेणालभन्त

* 'कुर्व्वन्त्यमृतेष्टका'—इति क ।

† 'कुर्व्वन्त्युत्सन्ना'—इति क ।

‡ 'वामकक्षायणो'—इति क ।

ऽथैतर्ह्रीमौ द्वावेवालभ्येते प्राजापत्यश्च वायव्यश्च तयोरेतो ब्राह्मण मुच्यते ॥ ३८ ॥ ४ ॥

॥ इति प्रथमप्रपाठके चतुर्थं ब्राह्मणम् [२. १.] ॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे, तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥

अथ द्वितीयाध्याये प्रथमं मग्निभ्यः कामाय पुरुषाश्वगोऽव्यजात्मकपञ्चपश्वालम्भपञ्च *। तत्र चतुर्विंशति सामिधेन्यः, वैश्वानरः पशुपुरोडाशः, कामपदयुक्ता याज्यानुवाक्या प्रदर्श्यन्ते। अथ वायव्यैकपश्वालम्भपञ्च। तत्र सप्तदश सामिधेन्यः, अत्रापि प्राजापत्यः पशुपुरोडाशः, शुक्लपदयुक्ता याज्यानुवाक्याश्च विधास्यन्ते। पशुद्वयसाधारणं मन्थदाम्नीप्रभृतिकं वक्ष्यते। एतत् सर्वं कात्यायनेन सूत्रितम्,—

"चिकीर्षमाण उत्तरस्यां फाल्गुन्यां पौर्णमासेनेष्ट्वा पञ्च पशूनालभतेऽदक्षिणान्"—इत्युपक्रम्य † "अग्निभ्यः कामाय पुरुषाश्वगोऽव्यजान्"—इति ‡, "समिध्यमानसमिद्धवत्यन्तरे समास्त्वाग्न इति § नव दधाति, आप्रियो द्वादशोर्ध्वा पश्वेति"—इति ‖,

---

* "पञ्च पशूनालभन्ते"—इत्यादि का० श्रौ० सू० १६ १ ८, इहापि ब्राह्मणे परस्तात (६ २ २ १६) द्रष्टव्यम् ।

† का० श्रौ० सू० १६ १ ५ । ‡ १६ १. ८ ।

§ वा० सं० २७ १—९ । विहिताश्च ता इहोत्तरत्र (६ २ २१, २५)।

‖ १६ १ ११ । आप्रियस्तु ताः वा० सं० २७ ११—२२ आम्नाताः ।

"एकादशान्तं शासप्रैषादि करोति, परिवृते पुरुषसंज्ञपनम्"
–इति *, वैश्वानर पशुपुरोडाश उपांशु, पशुदेवता च,
आग्नेय्यो याज्यानुवाक्या कामवत्य"–इति †, "अनालभ्यै-
ताम्, श्यामतूपरो वा प्राजापत्य, षड् दद्यात्, वायवे वा
नियुत्वते श्वेतलप्सुदी द्वे दद्यात्, प्राजापत्य पशुपुरोडाशो
द्वादशकपाल उभयो, काद्यो याज्यानुवाक्या प्राजापत्यस्य,
शुक्रवत्यो वायव्यस्य, वपाया वा, तुल्य मन्यत् सर्वेषु ‡"–इति।

तत्र प्रथम पञ्चपश्वालम्भपक्ष विधातु प्रजापतिवृत्तान्तं
प्रस्तौति— "प्रजापतिरग्निरूपाण्यभ्यध्यायदिति। पूर्वं प्रजापति-
रनेकान्यष्टौ रूपाण्यभिध्यातवान्, कुमाररूपात्मना परि-
णतम् अग्निमैच्छत्। स कुमारोऽग्नि मा पिता प्रजापतिरन्वि-
च्छतीति ज्ञातवान्। 'हन्त' इति प्रश्ने। 'मे' मम 'यद्' रूपम्
'एष' प्रजापति 'न वेद' न जानीयात्, 'तद् रूपम्' 'असानि'
भवामीति ॥ १ ॥

एव ज्ञात्वा,— "स एतान् पञ्च पशूनपश्यदिति। तदात्मना
परिणत मिति शेष। पश्यतियोगात 'पशु'-शब्द सम्पन्न इति
दर्शयति— "यदपश्यत् तस्मादेते पशव इति। पश्यति प्रज्ञा-
स्वन्तर मस्तीति कृत्वा पशुशब्दो निरुक्त ॥ २, ३ ॥

"स एतानिति। 'तेषु' पशुषु तादात्म्येन प्रविष्टम् 'एतम्' अग्नि
प्रजापतिरद्राक्षीत्। पश्यन्त्येतमग्नि मित्येतस्य देवनिमित्तादधि-
करणसाधन पशुशब्द इत्याह— "तस्माद्वेवैते पशव इति ॥ ४ ॥

* का० श्रौ० १६ १ १३ सू० ।

† का० श्रौ० १६ १ २५, २६, २७ सू० ।

‡ का० श्रौ० सू० १६ १ ३८—४३ । इत्याप्युक्तवत् ६ ५ २ब्रा० अष्टमम् ।

"स ऐक्षतेति। 'स' प्रजापति 'ऐक्षत' स्वमतं विचारितवान्। तदेव दर्शयति— "इमे वा अग्नि रिति। 'अग्नि' 'इमे वै' पुरुषादिपञ्चपशव एव, तत पृथक् दृश्यन्त इत्यर्थं। 'इमानेव' अग्न्यात्मकानेतान् पशूनेव आत्मान मभिलक्ष्य 'संस्करवै' पशुभि स्वरूपे स मात्मान संस्करिष्य इति पर्यालोचितवान्। पशूना मग्न्यात्मकत्व विशदयति— "यथा वा अग्निरिति। अग्ने-र्यथा दीपनधूमाभ्याहितदाहनभस्मसच्छादनादयो धर्मा, ते पशु-ष्वपि दृश्यन्ते इत्यतस्तेषा तदात्मकत्वम्। 'चक्षुर्दीप्यते' प्रकाशयुक्त रोचते, 'जग्ध' श्वासो धूम, 'अभ्याहित' पुर स्थित वस्तु 'दहति', 'एवं' 'बप्सति' भक्षन्ति पशव। "भस भर्त्सनदीप्त्यो"*, लिटि प्रथमपुरुषबहुवचने झौ द्विर्वचने कृते "घसिभसोर्हलि च" —इति † उपधालोपे रूप मिदम्। 'सीदति' अवसन्न भवति।

अग्निभ्य कामाय पशव इति ‡ सिद्धान्तयितु बहुदेवतार्थ मालम्भनं पूर्वपक्षयति— "तान् नानादेवताभ्य इति। अनूक्तान् पुरुषादीन् पञ्च पशून् 'नानादेवताभ्य' बहुदेवताभ्य 'आलिप्सत' आलब्धु मैच्छन्। "वैश्वकर्मण पुरुषम्"—इत्यादिना पञ्चानां पशूनां पृथक् पृथक् देवतासम्बन्ध उक्त § ॥ ५ ॥

"स ऐक्षत नानेति। 'स' प्रजापति एव विचारितवान्,

---

* जु० प० १८ धा०।

† पा० सू० ६ ४ १०० (वै०)।

‡ पुरस्तादुक्त ६४ पृ० १५ प द्रष्टव्यम् (का० श्रौ० सू० १६ १ ८)। वक्ष्यति चाज्ञाप्यनुपदम् ६ का० (५४ पृ० ६ प०, ६७ पृ० ४ प०)।

§ "यत्तु वैश्वकर्मणं पुरुष, वारुण मश्वम्, ऐन्द्र मृषभ, त्वाष्ट्र मविम्, आग्नेय मज मिति"—इत्यादि (का० श्रौ० सू० १६ १) कर्कोपाध्याय विचार्यम्।

—किमर्थं 'नाना' बहुभ्य 'देवताभ्य' पशुभ्य आलब्धुमिच्छामि ? ['अग्ने उ अहम्'—इति पदच्छेद] अह नु अग्नेरेव 'रूपाणि' 'कामये'। 'हन्त' इति साध्यसाधनयोर्वैयधिकरण्यजनिते आश्चर्ये। 'एनान्' पशून् 'कामाय' कामगुणयुक्ताय 'अग्निभ्य' अग्नये 'आलभे'—'इति' ऐक्षतेत्यन्वय। कामायाग्निभ्य इति सामानाधिकरण्ये कथ मग्निभ्य इति बहुवचनम् ? तत्राह—"तद् यदग्निभ्य इति। अग्निरूपापेक्षाया बहुवचनम्। 'तान्' अष्टाविति प्रागुक्तम्। "आप्रीतानिति। प्रयाजयाज्यादिभिराप्रीभि पर्य्यग्निकरणेन च संस्कृतान्, तदनन्तर मेव 'उदीचो नीत्वा' शामित्रदेश प्रापय्येत्यर्थ। 'सञ्ज्ञपन' नाम मारणम् *। मारणार्थं नयेदित्यर्थ ॥ ६ ॥

पशुशीर्षोपधान विधास्यते, तदर्थं प्रजापतिकर्त्तृक तदुपधान दर्शयति— "स ऐक्षत या वै श्रीरिति। द्वितीयाबहुवचनान्तम्। अत्र श्रीशब्देन अग्निरूपाणि विवक्षितानि। तानि 'अभ्यध्यासिषम्' ध्यातवानस्मि। 'ता' इमा श्रिय 'शीर्षसु' चक्षुराद्याश्रयेषु वर्त्तन्ते। 'हन्त'—इति हर्षे। "अत शीर्षाण्येवेत्यादि। निगदसिद्धम् † ॥

पशुशरीराणा मिष्टकोपकारित्व विवक्षन्नाह— "इतराणीति। अजशरीरस्य यज्ञे उपकरिष्यमाणत्वात् 'इतराणि' पुरुषादीना चतुर्णा पशूना 'कुसिन्धानि' मूर्द्धरहितानि

* "परिहृते पुरुषसञ्ज्ञपनम्—इत्यादि "वैश्य पुरुषो राजन्यो वा'—इत्यन्तो ग्रन्थ का० श्रौ० सू० १६ १ १४—१७ द्रष्टव्य.।

† तत्प्रकारश्चैव सूक्तं कात्यायनेन—"कण्ठेषु हुत्वा मन्त्रहीन शिरांसि स्यादर्थ"—इति श्रौ० सू० १६ १ १८।

शरीराणि * 'अप्सु' 'प्राप्लावयत्' प्रक्षिप्तवान् । "चतुर्णां अप्सु काय-प्रासनम्"–इति कात्यायनेन च सूत्रितम् † ।

अजेन शरीरेण यज्ञं समापितवन्त । एतेन यज्ञसमाप्तौ कारणं माह— "नेन्मे यज्ञ इति । 'मे' मम 'यज्ञ' मध्ये 'विकृष्ट' विच्छिन्न 'नेत्' नैव 'असत्' माभूत् 'इति'। यज्ञ-विच्छेदे प्रजापतेः किं मायात मिति तत्राह— "आत्मा वै यज्ञ इति। एतेन पशुना यज्ञसमापने उपपत्तिं दर्शयति— "एतेन पशुनेष्ट्वा तत् प्रजापतिरिति। 'यथा' येन प्रकारेण 'अग्ने' 'अन्तं न पर्येत्' कार्त्स्न्येन न परिगतो भवेत्, 'तत्' कर्म 'प्रजा-पति' 'अपश्यत्' दृष्टवानित्यर्थः । यदि सर्वैः पशुभिर्यजेत, तदानी मेव यज्ञसमाप्तेः सिद्धत्वात् अग्नेरेवान्तं परिप्राप्तवान्, अग्निरूपाणि कार्त्स्न्येन प्राप्तवान् भवति, तदयुक्तम्, उत्तरत्र कर्त्त-व्यत्व श्रवणादिति तात्पर्यम् ।

उत्तरत्र सर्वैः पशुभिर्यागं पूर्वपक्षयिष्यति— "तद्धैक आहु-रनेनैते सर्वैः पशुभिर्यजेत"–इत्यादिना ‡ । यज्ञसमाप्त्यनन्तरं शिष्टस्य अजपशुशरीरस्य च जले प्रासनं सूत्रितम्— "अजेन चरति, सस्थिते तस्य शेषप्रासनम्"–इति § ॥ ७ ॥

यदर्थं अप्सु पशुचतुष्टयकायप्रासनम्, तदिदानीं माह— "स ऐक्षत य मिमं मात्मान मप्सु प्रापिप्लव मिति । 'आत्मा-

* "श्रोणी यदूरू क उ तज्जजान याभ्यां कुसिन्धं सुदृढं बभूव" —इति अथ० सं० १० २ ३ ।

† का० श्रौ० सू० १६ १ १९ ।

‡ अस्मिन्नेव ब्राह्मणे चर्तुदशी कण्डिका द्रष्टव्या (५६ पृ० ८ पं०) ।

§ का० श्रौ० सू० १६ १ २१, २२ ।

नम्' पशुदेहानित्यर्थः । 'प्रविद्धानां' प्रक्षिप्तानाम् 'एषां' पशूनां 'यत्' शरीरगत रसादिकम् 'अप्सु' 'प्रत्यतिष्ठत्' प्रतिष्ठितम्, 'ता' 'अप' 'समभरत्' सम्भृतवान्, 'यत्' च अस्थिमांसादिकम् 'अस्या' पृथिव्या प्रतिष्ठितम्, 'ता' 'मृद्' मृत्तिकां सम्भृतवान्, 'तदुभयम्' 'अपो मृदश्च' 'सम्भृत्य' सम्भृत्य 'इष्टका मकरोत' * ॥ ८ ॥

पक्का इष्टकाश्चेतव्या इति वक्तु माह— "स ऐक्षत यदि वा इद मित्थ मेव सदात्मान मभिसंस्करिष्य इति । 'यदिदं' जलमृदात्मक मिष्टकारूपम् 'इत्थम्' अपाकेन 'एव' 'आत्मानम्' 'अभि' लक्ष्य 'संस्करिष्ये', तर्हि 'मर्त्य' मरणधर्मा 'कुणप' [जीवरहितो देह कुणप इत्युच्यते] अत एव 'अनपहतपाप्मा भविष्यामि'–इति विचार्य, ता इष्टका अग्निना पक्का अकरोत्, अग्निना पक्क मेव 'हवि' 'अमृतम्' अमरणधर्मकम् 'भवति' इति । अग्निनेष्टकापाक कर्त्तव्य इति दर्शयति— "तस्मादग्निनेष्टका इति ॥ ९ ॥

इष्टकाकरणकाल दर्शयति— "तद्यदिष्ट्वा पशुनापश्यदिति । 'पशुना' अजेन 'इष्ट्वा' इष्टवान् 'इष्टका', अत इष्टादनन्तर ज्ञात्वा इतीष्टक-शब्दो निरुक्त । पशुयागात् पूर्व मिष्टकाकरण निन्दति— "अनिष्टका ह ता भवन्तीति । 'अथो' 'पशो' पशुयागात् 'पुरा' इष्टकाकरणम् 'अन्यदेव' अशास्त्रीय मित्यर्थ ॥ १० ॥

पशुशीर्षोपधानानन्तर मिष्टकोपधान पशुभिर कावन्धसम्बन्ध-

---

* तदुक्तम्—"ततो मृदिष्टकार्था, पच"—इति का० औ० सू० १६ । २० ।

रूपेण प्रशंसति— "तथास्मा श्रिय एतानि तानि पशु-शीर्षाणीति ॥ ११ ॥

यदुक्तं पशूनां मन्त्यात्मकत्वम्, तत् प्रशंसति— "त एते सर्वे पशवो यदग्निरिति। यत पशूनां मन्वेन तादात्म्यम्, अत परस्पर मभिसम्बन्धो दृश्यत इत्याह — "तस्मादन्नाविति। अग्निरूपाणि कामयमानस्य प्रजापते पशुयागेन तच्छरीरा-ङ्गकेष्टकोपधानेन कि मायात मिति, तद् दर्शयति— "ततो वै प्रजापतिरग्निरभवदिति। तत पशुयागेन तदात्मकोऽग्नि-रेव सम्पन्न इत्यर्थ। चयनस्य अग्निरूपत्वावाप्ति फल मिति तात्पर्यम् ॥ १२ ॥

पूर्वस्य पश्वालम्भ, तत्रैकेन पशुना याग उक्त, इदानी त मेव पक्ष दृढयितु सर्वपशुयाग पूर्वपक्षयति— "तद्धैक आहु-रिति *। 'अत्र' अग्नौ 'सर्वै' पञ्चभि पशुभि 'यजेत'। 'यत्' यदि 'प्रजापति' 'सर्वै' पशुभि 'अयक्ष्यत' याग मक-रिष्यत्, 'तत् एव अग्ने अन्त' 'पर्यैष्यत्' अगमिष्यत्, न तथा कृतवान्। क्रियातिपत्तौ यजतेरेतेष लृङ् प्रयोग †। तस्मात् सर्वैर्यागकरण मेवान्त्यन्तगमन मित्यर्थ। तद् दूषयति— "न तथा कुर्यादिति ‡। 'तत्' तर्हि 'देवानाम्' 'इतात्' गमनात् 'इयात्' अपगतो भवतीत्यर्थ। तदेव विवृणोति— 'अथो पथ तद्दियात्' प्रजापतिकृताद् यज्ञमार्गात् प्रच्यवेतेत्यर्थ ॥

सर्वयागपक्षे वाधां दर्शयति— "अथो कि तत. सम्भरेदिति।

* का० श्रौ० सू० १६ १ २३।
† 'लिङ्निमित्ते लृङ् क्रियातिपत्तौ"—इति पा० सू० ३ ३ १३९।
‡ का० श्रौ० सू० १६ १ २४।

एव सति सम्भरणार्थता विरुध्यते, सम्भरणार्थं हि कुसिन्धानाम् अप्सु प्राशनम् *, तत इष्टका मृद्भिरद्भिश्च कार्या, अत सर्वप्रचारे सम्भरणानुपपत्तिरित्यर्थ । कात्यायनस्तच्छाखान्तरवाक्यानुसारे-णैकस्मिन्नपि सम्भरणानुपपत्ते सर्वप्रचार मेकप्रचार समविकल्प ज्ञातवान् । तथाहि— "चतुर्णा मप्सु कायप्राशनम्, ततो मृदि-ष्टकार्थापश्च, अजेन प्रचरति, सᳬस्थिते तस्य शेषप्राशनम्, सर्वैरेके, एकस्यापि कि तत सम्भरेदिति श्रुते"—इति †। एकस्यापि पशोरालम्भे 'कि तत सम्भरेत्?' तत तुल्य मेव। तस्माद् विकल्प सर्वैर्वाजेन वेति ॥ १३ ॥

पश्वालम्भन मायतनकरणात्मना प्रशसति— "यद् वेवैताम् पशूनालभत इति। आयतनशब्दार्थ माह— "अन्न वा इति। कार्यकारणयोरभेदात् । 'तदेतत' पशुरूप मन्न 'पुरस्तात निद-धाति', 'तत्' 'एनम्' 'पश्यन्' 'अग्नि' 'उपावर्त्तते' समीपे गतो भवति। यथा लोकेऽन्नार्थी पश्यन्नेवान्न तत्समीप गच्छति, तद्वदित्यर्थ ॥ १४ ॥

पशूननुक्रामति-- "पुरुषोऽश्व इति। "एतावन्त इति। यत 'सर्वे पशव' एतेषु पुरुषगवाश्वादिपशुषु अन्तर्भूता, अत उपजीव्याना सर्वेषा मन्नरूपाणा पशूना मवरोध इति नाना-जातिनिबन्धना स्तुति ॥ १५ ॥

पशुगतपञ्चसङ्ख्या प्रशसति-- "पञ्च भवन्ति, पञ्च ह्येते-

---

* 'कुसिन्धे कुथितया म्रदा अद्भिश्चेष्टकानां दार्ढ्यं मुपजायते' —इति कर्क (का० श्रौ० सू० १६ १ २३)। पुरस्ताच्चेह द्रष्टव्यम् (७ क०, ५४ पृ० १३ पं०—६८ पृ० १ प०)।

† का० श्रौ० सू० १६ १ १६—२४।

ऽम्नय इति। चितिसङ्ख्यापेक्षया अग्नीनां पञ्चसङ्ख्यावत्त्वम् *। "पञ्चायतनानीति। पञ्चरूपाणि पञ्च स्थानानि कल्पयतीत्यर्थं ॥ १६ ॥

"तद्यदग्निभ्य इतीति। एतद् वाक्य पूर्ववद् व्याख्येयम् †। अग्निभ्य कामायेति यद्यग्निबहुत्व तद्रूपापेक्षेति ॥ १७ ॥

पशूना मालम्भनक्रम विधत्ते—'पुरुष प्रथम मालभत इति। "पुरुष९ ह्यन्वग्न इति। 'पुरुषम्' 'अनु'-लक्ष्य, पुरुषानुगामी यतोऽग्न इत्यर्थ। एव मुत्तरत्र। "यथापूर्व मिति। पूर्वानालम्भानतिक्रम्य, यथाक्रम मित्यर्थ। 'यथाश्रेष्ठम्' तत्र ये ये श्रेष्ठा, तानप्यनतिक्रम्येत्यर्थ ॥ १८ ॥

तेषा बन्धनार्थं रशनां विधत्ते— "तेषा विषमा रशना स्युरिति। 'विषमा' स्थौल्यह्रासवत्त्वेन भवन्ति। वैषम्यं च दर्शयति— "पुरुषस्य वर्षिष्ठाथ ह्रसीयसीत्यादि। पुरुषपशो रशना 'वर्षिष्ठा' अतिशयेन वृद्धा भवेत्। अत्र वर्षिष्ठेति स्थौल्यायामापेक्षया। "प्रियस्थिर"–इत्यादिना ‡ वृद्धशब्दस्य वर्षिष्ठादेश। 'अथ' अश्वपशो 'ह्रसीयसी' आयामस्थौल्याभ्या ह्रस्वा। तदपेक्षया गोपशो ह्रस्वा। ततो द्वयो। 'अथ ह्रसीयसी'–इति वीप्सया पूर्वपूर्वरशनापेक्षयोत्तरोत्तरह्रासो विवक्षित §। "यथारूप मिति। पुरुषादिपशूना माकृतिबलादिक मनतिक्रम्येत्यर्थ। "सर्वास्त्वेवेति। 'तु' शब्द पक्षा-

* इहापि (का० श्रौ० सू० १६ १ ७) कर्कोक्तं द्रष्टव्यम्।

† पुरस्ताद् (६७ पृ० ५ पं०) द्रष्टव्यम्।

‡ पा० सू० ६ ४ १५७।

§ "वर्षिष्ठरशना पुरुषोऽनुपूर्व्या इतरेषाम्" का० श्रौ० १६ १ ८।

न्तरद्योतनार्थः । सर्वा अपि रशना 'समा' सदृश्यायामस्थौल्या इत्यर्थः । "सर्वास्त्वेव समा."–इतिवाक्यस्य विवरणम्— "सर्वा" सदृश्य इति । यद्वा, आयामस्थौल्यादिना साम्यं वस्तु पृथगुपन्यासः * ।

रशनासाम्य इत्युच्यते पशूनां परस्परसाम्यादित्याह— "सर्वे ह्येते समा इति । साम्य मेव दर्शयति— "अग्नयो ह्युच्यन्त इति । यस्मात् एते पशवोऽग्नय इत्युच्यन्ते, तदत्र मिति चोच्यन्ते । पशूना मग्नित्व मन्नात्मकत्वञ्च पूर्व मेव दर्शितम्— "स ऐक्षतेमे वा अग्नि"–इति †, "यद्वैताम् पशूनालभत आयतन मेवैतदग्नये करोति, न ह्यनायतने कश्चन रमते, अन्नं वा आयतनम्"–इति ‡ च । 'तेन' अग्नित्वेन सर्वे पशव 'समा सदृशा' इति रशना अपि समा कार्या इत्यर्थः ॥ १८ ॥

"तदाहुरिति । अग्निचयने पञ्चसङ्ख्याका इष्टका उपधेया इति वक्ष्यते §, तत्र पशुपरिग्रहेणैव पञ्चेष्टका अपि परिगृहीता इति वस्तु तत् कथं पश्वालम्भमात्रेण तादृशसाम्ये स्वीकार कृत इति पृच्छति— "कथ मस्यैषोऽग्निरिति । 'अस्य' चिकीर्षमाणस्य यजमानस्य 'पञ्चेष्टक' 'एष' प्रक्रममाण 'अग्नि' 'कथं' 'पशुषु' परिग्रहे 'आरब्ध' प्रक्रान्तो भवतीति । उत्तरत्र करिष्यमाणस्याग्ने प्रथम स्वीकार कर्त्तव्य इत्यभिप्राय ।

पशुष्वेव पञ्चेष्टका सम्पादयति—"पुरोडाशकपालेषु न्वेवाप्यत इत्यादिना । चयने वैश्वानरादीना पशुपुरोडाशाना सम्भरणात्

* "सर्वेषां वा तुल्या"'—इति का० श्रौ० सू० १६ २ १० ।

†, ‡ पुरस्तात् (५३ पृ० ५ क०, ५६ पृ० १४ क०) द्रष्टव्यम्

§ द्वितीयप्रपाठकीयद्वितीयब्राह्मणादितस्तद् द्रष्टव्यम् ।

तत्कपालेषु मृन्मयीष्टका भाव्यते, कपालानां मृन्मयत्वात् ताहृ-
शेष्टकाप्रारम्भ , पशुवालम्भेन पशिष्टकाप्रारम्भ ।

वपावदानसमये हिरण्यशकलद्वय निधातव्यम् । तदा-
हापस्तम्ब —"जुह्वा मुपस्तीर्य हिरण्यशकल मवधाय ज्ञात्वा
वपा मवदाय हिरण्यशकल मुपरिष्टात् ज्ञत्वाभिघारयति"—इति * ।
तथा चैतरेयकम्— "यद्यपि चतुरवत्ती यजमान स्यादथ पञ्चा-
वत्तैव वपाज्यस्योपस्तृणाति हिरण्यशल्को वपा हिरण्यशल्क आज्य-
स्योपरिष्टादभिघारयति"—इति † । 'अथ' 'यत्' तस्माद् 'वपा
मभित' पूर्व मुपरिष्टाच्च 'हिरण्यशकलौ भवत तेन हिरण्ये-
ष्टका' भवति । इध्मयूपपरिधिस्वीकारात् वानस्पत्येष्टकाधानेन
उलूखलमुसलस्रुगाद्युपधान मुपलक्षितम् । आज्यप्रोक्षणीपुरो
डाशकरणेनाप्रूपेष्टका भवति । 'अत' सर्वासा मिष्टकाना
पशुबन्धात् सङ्गेण ता अपि प्रारब्धा भवन्तीत्यर्थ ॥

यद्यपि मार्त्तिकी एका एव, अथापि मृन्मयकपालपश्वादि-
सम्बन्धात् पञ्चेष्टकासम्पादनं प्रागुक्तम्— "तदाहु कथ मस्यैषो-
ऽग्नि पञ्चेष्टक ?"—इत्यादिना ॥ २० ॥

अत्र कात्यायन "समिध्यमानसमिद्धवत्यन्तरे समास्वाग्न इति
नव दधाति"—इति ‡ । दर्शपूर्णमासयो पञ्चदश सामिधेन्य §,

---

* आप० श्रौ० सू० १६-१७ प्रश्नयोरग्निचयनगतसूत्राणि सन्ति ।

† ऐ० ब्रा० २ २ ४ ।

‡ का० श्रौ० सू० १६ १ ११ ।

§ यद्यपि तैत्तिरीयसामिधेनीसङ्ख्या एकादशैव पर माद्यन्तयो
ऋचोस्त्रिस्त्रिरावृत्त्या पञ्चदशैव सम्पद्यते । तदुक्त पुरस्तात "त्रि,
प्रथमा मन्वाह त्रिरुत्तमाम् ताः पञ्चदश सम्पद्यते"—इति (१ का०

अत्र "समिध्यमानो अध्वरे"–इत्यृक् *, समिद्धो अग्न आहुत" –इत्यृक् †, अनयो प्रकृतिगतयो सामिधेनीमध्यपठितयो-र्ऋचोर्मध्ये "समास्त्वाग्न ऋतवो वर्द्धयन्तु"–इत्याद्या नव ‡ ऋचो दध्यात्। पूर्व "प्र वो वाजा अभिद्यव"–इत्याद्या पञ्चदश §, इदानीं मध्ये निहिता नव, उभयस्य चतुर्विंशति-र्भवतीति तन्नैतद् दर्शयति— "तेषा चतुर्विंशति सामिधेन्य इति। अग्निसमिन्धनसाधनभूता ऋचः सामिधेन्य इत्युच्यन्ते। "समिधा माधाने षेण्यण्"–इति ‖ षेण्यण् प्रत्यय। सामि-धेनीगता चतुर्विंशतिसङ्ख्या प्रशसति— "चतुर्विंशत्यर्द्धमासो वै सवत्सर इति। सवत्सरस्य द्वादश मासा, मासस्य द्वावर्द्धमासौ, इति सवत्सरस्य चतुर्विंशतिरर्द्धमासा, तादृश' सवत्सर एवाग्नि, "सवत्सरे कुमारोऽजायत"–इति प्रागाम्नानात् ¶। अग्ने सवत्सरात्मकत्वेन प्रकृते किमायात मिति, तत्राह— "यावानग्निरिति। 'अग्नि' 'यावान्' यत्परिमाण, 'अस्य' अग्ने 'यावती' यत्परिमाणा 'मात्रा' अवयवा यावन्त, 'तावता'

२ अध्या० ५ ब्रा० ६, ७ क)। ऋकसहिताया माम्नात 'प्र वो वाजा' —इति सूक्त यद्यपि पञ्चदशर्गात्मकम् (३ २७ १—१५), तथापीह तस्य न ग्रहण युज्यते, तत्र समिद्धवत्या ऋचोऽभावात 'समिध्यमान समिद्धवत्योरन्तरे'—इतिविधानस्य वैयर्थ्यापत्ते।

* तै० ब्रा० ३ ५ २ ६ (तै० स० ३ २८ ४)।

† तै० ब्रा० ३ ५ ३ १० (ऋ० स० ५ २८ ५)।

‡ वा० स० २७ १—६, तै० स० ४ १ ७ १—६।

§ तै० ब्रा० ३ ५ २ १—११। आद्यन्तयोर्ऋचोस्त्रिस्त्रिराष्टत्त्यैव पञ्चदशत्व मिह सम्पद्यत इत्युक्तम्।

‖ पा० ४ ३ १२० सू० १० वा०।　¶ ४० पृ० १७ प० द्रष्टव्यम।

तत्परिमाणै' तैरंशैरेव 'एनम्' अग्निं 'समिन्धे' सन्दीपितवान् भवति। अथ मन्त्रार्थः — अग्ने संवत्सरात्मकत्वे संवत्सरस्य यावन्तो यावन्तोऽवयवा मासार्द्धमासाद्यात्मान, तावद्भिरवयवै 'एन' चित्याग्नि 'समिन्धे'। अथ वा "यावानग्निरिति, अवयवाग्नि-परिमाणवचनम्, "यावत्यस्य मात्रेति, अवयवपरिमाणवचनम्, 'तावता' तत्परिमाणेनाग्निसंवत्सरात्मना 'एनम्' अग्निम् आह-वनीय 'समिन्धे' इति। अनेनाग्नि स्वय मग्निना समिद्धो भवतीत्युक्त भवति। तथा च श्रूयते — "अग्निनाग्नि समिध्यते कविर्गृहपतिर्युवा"—इति * ॥ २१ ॥

प्रकारान्तरेण चतुर्विंशतिसङ्ख्यां प्रशंसति— "यद्वेव चतु-र्विंशतिरिति। गायत्र्यात्मकत्व मग्ने प्रागुक्तम्— "यद्वेवाष्टावग्नि-रूपाणि अष्टाक्षरा गायत्री, तस्मादाहु गायत्रोऽग्निरिति"— इति †। "तावतैवेति। गायत्र्यक्षरसङ्ख्याकैरवयवै, 'एनम्' अग्निम् समिद्धवान् भवतीति ॥ २२ ॥

"यद्वेवेति। "चतुर्विंशो वै पुरुष इति। चतुर्विंशति सङ्ख्याकावयवयुक्त 'चतुर्विंश'। तानेवावयवान् दर्शयति— "दश हस्त्या इति। हस्तयोर्भवा अङ्गुलयो दश, पादयोर्भवा दश, 'चत्वार्यङ्गानि' पादद्वयमुखमस्तकाख्यानि। एव चतु-र्विंशतिरङ्गानि, 'पुरुष' उक्तावयवयुक्त 'प्रजापतिः' प्रजापति रूप। "स एव पुरुष प्रजापतिरभवत्"—इत्यादिना पुरुषस्य प्रजापतित्व मुक्तम् ‡। प्रजापतेरग्नित्वञ्च "स पुरुष प्रजापति-

---

* ऋ० सं १ १२ ६।

† पुरस्तात् ४२ पृ० ४ पं० द्रष्टव्यम्।

‡ पुरस्तात् २ पृ १६ पं द्रष्टव्यम्।

रभवदय मेव स योऽय मग्निश्चीयते"–इति *, तथा चैवाध्याये "प्रजापतिरग्निरूपाण्यभ्यायत्"–इत्युपक्रम्य, "ततो वै प्रजापति-रग्निभवत्"–इत्यन्तेन †। "तावतैवैन मिति। तावत्परिमाणेन चतुर्विंशत्यङ्गात्मनाग्निना 'एनम्' अग्निं दीपितवान् भव-तीति ॥ २३ ॥

"उभयी गायत्रीश्च त्रिष्टुभश्चान्वाहेति। सामिधेनीषु "प्र वो वाजा"–इत्याद्या गायत्र्य ‡, "समास्त्वाग्न ऋतवो वर्द्ध-यन्तु"–इत्याद्या त्रिष्टुप्छन्दस्का §, ता उभयी अनुब्रूयात्, होतेति शेष ।

सामिधेनीगतगायत्रीत्रिष्टुप्छन्दांसि प्राणात्मसमिन्धनरूपेण प्रशंसति— "प्राणो गायत्रीति। गायत्र्यास्त्रिपात्त्वम्, प्राणस्य च प्राणापानव्यानात्मना त्रित्वसङ्ख्यावत्त्वम्। त्रिष्टुभो वीर्यरूप-त्वात् उरस सकाशादुत्पत्तेः आत्मरूपता। "मध्ये त्रिष्टुभो भवन्तीति। प्रथम "प्र वो वाजा"–इत्याद्या "आ नो अध्वरे" इत्यन्ता गायत्र्य, अन्ते च "समिद्धो अग्निराहुत इत्याद्या गायत्र्य, समिध्यमानसमिद्धवत्योर्विधीयमाना "समास्त्वाग्न ऋतव इत्याद्यास्त्रिष्टुभ इत्यर्थ ‖। "मध्ये ह्यय मात्मेति। गायत्रीत्रिष्टुभो प्राणापानरूपत्वोक्ते प्राणापानयोरात्मपूर्वपर-भागवर्त्तित्व प्रसिद्धम्, मध्ये त्रिष्टुभा निधानस्योक्तत्वात्।

* पुरस्तात् ३ पृ० १ प० द्रष्टव्यम्।
† १ब्रा० १—१२ कण्डिके (५३—५६ पृ०) द्रष्टव्या ।
‡ तै० ब्रा० ३ ५ २ १—११।
§ वा० स० २७ १—६, तै स० ४ १ ७ १—६।
‖ पुरस्तात् २१कण्डिभाष्य द्रष्टव्यम्।

प्राग गायत्रीसमविभागं वारयन्नाह— “भूयसी पुरस्ताद् गायत्रीरन्वाहेति। “प्र वो वाजा अभिद्यव”–इत्याद्या एकादश गायत्र्य प्रथम मनुवक्तव्या , अन्ते च “समिद्धो अग्निराहुत”–इत्याद्यास्तस्र इत्यर्थ । प्राणा अपि पुरस्तात् नासापुटयोरधिक निस्सरन्ति , ब्रह्मरन्ध्रगत मित्यभिप्राय ॥ २४ ॥

इदानी मध्ये निधीयमाना ऋचस्तदनुवचन विधत्ते— “सोऽन्वाह समास्त्वाग्न ऋतवो वर्द्धयन्त्विति *। मन्त्रस्याय मर्थ ,— अत्राग्निपदेन प्रजापतिरुच्यते , “ततो वै प्रजापतिरग्निरभवदिति प्रागाम्नानात् †। उत्तरत्र तासा नवाना मग्निरैव द्रष्टा प्रजापतिर्देवतेति वक्ष्यति ‡ , अतोऽपि अग्निपदेन प्रजापति रैव सम्बोध्य । हे ‘अग्ने !’ सवत्सरात्मक प्रजापते । ‘त्वा’ त्वा विस्रस्तम् ‘ऋतव’ वसन्ताद्या , प्रजापते सवत्सरात्मकत्वात् तदवयवा ऋतव ‘समा’, ‘सवत्सरा’ च ‘वर्द्धयन्तु’ । ‘ऋषय’ ‘ऋषि’ पदेन प्राणा उच्यन्ते , “के त ऋषय ? इति , प्राणा वा ऋषय ” –इति श्रुते § । ‘यानि सत्या’ सत्कर्माणि, तानि च त्वा वर्द्धयन्तु । अतोऽवयववृद्धे ‘दिव्येन’ द्युलोकभवनेन आदित्येन ‘सन्दीदिहि’ सन्दीप्तो भव। “दीदयतिर्दीप्तिकर्मा”–इति यास्क ‖। दीप्य-

* “समास्त्वाग्न ऋतवो वर्द्धयन्तु सवत्सरा ऋषयो यानि सत्या। सन्दिव्येन दीदिहि रोचनेन विश्वा आ भाहि प्रदिशश्चतस्र ”— इति वा० स० २३ १ ।

† पुरस्तात (५६ पृ० ६ पं०) द्रष्टव्यम् ।

‡ एतत्परस्ता मेव (६० पृ० १ प०) स एता अपश्यत”—इत्यादि।

§ इहैव पुरस्तात द्रष्टव्यम् (१ क० ३ प०) ।

‖ निघ १ १६ ५ । निरु० १० २ ६ ।

तेर्वा यङ्लुकि लोटि चेर्हौ "लोपोव्योर्वलि"-इति * लोपे अभ्यासदीर्घे कृते रूपम्। 'विश्वा' सर्वास्वतस्त्र प्रदिशश्च 'अभि' लक्ष्य 'आभाहि' "भा दीप्तौ" † भाहि। अत्रान्तर्णीतण्यर्थे दीपयेति।

मन्त्राणा मर्थं विवक्षु तेषा प्रजापतिसमिन्धनार्थतां दर्शयति— "प्रजापति विस्रस्त मिति। यदा 'विस्रस्तं' विश्लिष्टाङ्ग 'प्रजापतिम्' अग्नि 'समदध्यात्' सयोजितवान्, 'त मब्रवीत्', प्रजापतिरिति शेष। 'मत्सम्मिता' मम पर्याप्ता या 'सामिधेन्य', 'ताभि' 'मा' मा प्रजापति 'समिन्त्स्व' सन्दीपयेति। इन्धेर्लोटि मध्यमे रूपम ॥ २५ ॥

एव मुक्तोऽग्नि प्रजापति समिन्धनार्थं सामिधेनीमन्त्रान् दृष्टवानित्याह—"स एता अपश्यत् समास्त्वाग्न ऽऋतवो वर्द्धयन्त्वितीति। 'इति' शब्द प्रकारे। एवम्प्रकारा नव ऋचोऽपश्यदित्यर्थ ‡।

मन्त्र प्रतिपाद मनूद्य व्याचष्टे— "समास्त्वाग्न ऋतवो वर्द्धयन्त्वित्येतदिति ॥ २६ ॥

नवाना मपि ऋचा मेकाभिधेयतां दर्शयति— "ता एता एकव्याख्याना इति। एकार्था इत्यर्थ। त मेवार्थ दर्शयति— "एत मेवाभीति। 'यथा' येन प्रकारेण अग्नि 'एत मेव' प्रजापति 'सस्कुर्यात्', 'एत' विस्रस्त 'सन्दध्यात्' सयोजयेत्, तथा 'एत' 'जनयेत्' उत्पादयेत्। एव

* पा० सू० ६ १ ६६।

† धा० प० १०४० धा०।

‡ का० श्री० सू० १६ १ ११

मर्थवत्त्वेन व्याख्यातास्य मिति तात्पर्यम्। तासा मव्याबेंयत्वं प्रजापतिदेवत्यत्व च दर्शयति— "यदग्निरपश्यदिति। 'समैन्त'- इति लङि "आडजादीनाम्"—इत्याडागम * ॥ २७ ॥

कात्यायन — "आप्रियो द्वादशोर्ध्वा अस्येति। तद् द्वादश- सङ्ख्या प्रयाजयाज्या विधत्ते— "द्वादशाप्रिय इति। तनू- नपान्नराशसयो साहित्ये द्वादशत्वम्। आप्रीगतां सङ्ख्या सव- त्सरात्मना प्रशसति— "द्वादशमासा सवत्सर इति। सवत्सरे जातत्वादग्नेस्तदात्मकत्वम्। "यावानग्निरिति। अवयविपरि- माणवचनम्। "यावत्यस्य मात्रेति। अवयवपरिमाणवचनम्। 'तावता' तत्परिमाणैरवयवैर्मासात्मभि 'एनम्' अग्निम् 'आप्रीत- वान्' भवति। सवत्सरस्य मासा अवयवा, तदात्मकस्याग्ने- रपि प्रयाजयाज्या अवयवा, अनेन स्वैरेवावयवैरग्निराप्रीत- वान् भवतीत्यर्थ † ॥ २८ ॥

द्वादशसङ्ख्या मेव द्वादशाक्षरजगत्यात्मना स्तौति— "यद्वेव द्वादशेति। 'इय वै जगती' पार्थिवाभ्पूरितप्रजापतिमध्य- शरीरादुत्पत्तेर्जगत्या भूमिरूपत्वम्। 'अस्या' भूमौ 'सर्वं' जगत् स्थावरजङ्गमात्मकं तिष्ठति। "इय सु वा अग्निरिति। भूमा- वधिकरणे सर्वेषा मग्नीनां चयनाधाराधेययोरभेदेन अग्नेर्भूमि- रूपत्वम्। "तावतैवेति। तावत्सङ्ख्याकैर्जगत्यक्षरात्मकैरवयवै- राप्रीतवान् भवतीति ॥ २९ ॥

"यद्वेव द्वादशेति। ता मेव सङ्ख्या सर्वच्छन्दोरूपजगत्या- त्मना प्रशंसति— "जगती सर्वाणि छन्दासीति। जगत्यां सर्वेषां

* पा० सू० ६ ४ ७२।

† का० श्रौ० सू० १६ १, १२

गायत्र्यादीनां छन्दसा मन्त्रभावात्, अधिकाक्षरत्वात्। "ताव-त्तैवेति। तावद्भिर्गायत्र्यादिच्छन्दोरूपैर्जगत्यक्षरैरेव अग्निं प्रीणित-वानिति ॥ ३० ॥

तानाप्रीमन्त्रान् दर्शयति— "ता एता ऊर्ध्वा अस्य समिधो भवन्तीति *। एतासा मृचा मर्थं विवक्षु प्रजापत्याप्रीणनार्थता दर्शयति— "प्रजापतिं विस्रस्त मिति ॥ ३१ ॥

प्रजापतिना स्वप्रीणनार्थं मभ्यर्थितोऽग्निराप्रीमन्त्रान् दृष्टवा-नित्याह— "स एता अपश्यदूर्ध्वा अस्य समिधो भवन्तीतीति। 'इति'-शब्द प्रभृतौ, एतदाद्या द्वादश ऋचो दृष्टवान्।

प्रथममन्त्रस्याय मर्थं,— अत्रापि अग्निरूप प्रजापतिरेव सम्बोध्य, पूर्वं "ताभिर्मा प्रीणीहीति"-इति प्रजापतिप्रीणन-स्योक्तत्वात् †। 'अस्य' प्रसिद्धस्य अग्ने 'शुक्रा' शोचमानानि, 'शोचींषि' तेजांसि, 'ऊर्ध्वा' ऊर्ध्वानि भवन्ति, 'द्युमत्तमा' नैर्लोप, वीर्यवत्तमानि। अग्निं विशिनष्टि— 'सुप्रतीकस्य' शोभनावयवस्य प्रजापते 'सूनो' पुत्रस्य। प्रजापतेर्विस्रस्त सन्धानोक्तेस्तत्पुत्रत्वम्। प्रतिपाद मनूद्य व्याचष्टे— "ऊर्ध्वा ह्येतस्य समिद्धस्येति ॥ ३२ ॥

एतेषा माप्रीमन्त्राणा मेकाभिधेयता दर्शयति— "ता एता एकव्याख्याना एत मेवाभीति। "समास्त्वाग्न ऋतव"-इत्यत्रोक्त-ब्राह्मणवाक्यवद् व्याख्येयम् ‡। पूर्ववदेवाग्नि प्रजापतिसम्बन्ध दर्शयति— "ता आग्नेय्य इति ॥ ३३ ॥

* वा० सं० २७ ११—२२

† एतत्पूर्वस्या मेव कण्डिकां द्रष्टव्यम् (६१ पृ० १० पं०)।

‡ ६० पृ० १ पं०, ७६ पृ० १५ पं० द्रष्टव्यम्।

"ता विषमा विषमपदा इति। 'ता' प्रयाजयाज्या' 'विषमा', वैषम्य मेव दर्शयति 'विषमपदा' पादैर्विषमा, काश्चन त्रिपदा काश्चन चतुष्पदा, अत एव 'विषमाक्षरा' अक्षरैरपि विषमा, न्यूनाधिकाक्षरैर्युक्ता, अत एव 'छन्दांसि विषमाणि' काश्चन त्रिष्टुभ, काश्चन गायत्र, काश्चन उष्णिह। "अथो यान्यस्याध्यात्म मिति। 'अस्य' अग्ने 'अङ्गानि' अपि 'विषमाणि' न्यूनाधिकपरिमाणानि। अत एव विषमाभिराप्रीत प्रजापतेर्विषमाणि अङ्गानि प्रीणितवान् भवतीत्यर्थ ॥ ३४ ॥

अथ प्रागुक्तान् पुरुषादीन् पञ्च पशूननुलक्ष्य निर्वापनीयं पशुपुरोडाश सदेवताकं विधत्ते— "वैश्वानर पशुपुरोडाश इति। विश्वानरहितत्वात सर्वाग्निरूपता तस्य ॥ ३५ ॥

"यद्वेव वैश्वानर इति। सर्वचितीना ममृतात्मकत्वोक्तेरग्नीना मृतुत्व मुक्त मित्याह— "अग्नयो वा ऋतव इति। "वैश्वानर पशुपुरोडाश इत्यत्र साक्षादग्निसम्बन्धो न प्रतीयत इति मत्वा केचित् अग्नये वैश्वानराय पशुपुरोडाश इत्यग्निसम्बन्धद्योतनार्थं मिद प्रक्षिपन्ति, तदतिरेकेण दूषयति— "यदग्नय इतीति। "स्यादति तद्रेचयेदिति। तस्य पुरोडाशस्य द्वादशकपालसङ्ख्यत्वं विधत्ते— "द्वादशकपाल इति *।

अथात्र वपापुरोडाशहविषा मग्निदेवत्या कामपदयुक्ता याज्यानुवाक्या विधत्ते— "आग्नेय्यो याज्यानुवाक्या इति ॥ ३६ ॥

अत्र कात्यायन.—"त्वङ्मस्तिष्कोद्धृतानि हुताक्तानि शिरांसि निदधाति, सकलानि वा, अन्यानि वा हिरण्मयानि वा मृण्म

---

* का० श्रौ० १६ १ ३८।

यानि वानालभ्यैतान्"–इति *। त्वगेव त्वक्, मस्तिष्कशब्देन शिरःकपालगता मज्जाभिधीयते, ते उद्धृत्य हृतसिक्तानि उक्त-पुरुषादिपञ्चपशुशिरांसि, 'सकलानि' त्वङ्मस्तिष्कसहितानि 'वा' दध्यात्, अथ वा उक्तानुक्तान् पुरुषादिपशूनालभ्य सञ्ज्ञपन मक्कत्वेत्यर्थः, 'अन्यानि' सञ्ज्ञपनहृतानि पञ्च पशुशीर्षाणि दध्यात्, अथ वा तत्प्रतिनिधित्वेन 'हिरण्मयानि' सुवर्णनिर्मितानि, 'मृन्मयानि' वा गृह्णीयात् इति विकल्पत्रय मिति सूत्रार्थः।

तत्र आलभ्भपक्ष एव मुख्य इति सिद्धान्तयितुं तान् पक्षान् सदोषान् क्रमेणोपन्यस्यति— "तद्धैक इत्येवैतानि पशुशीर्षाणि विस्त्वोपदधतीत्यादिना। 'इत्येव' वक्ष्यमाणप्रकारेण 'वित्त्वा' विदेर्लाभार्थस्य क्त्वा-प्रत्यये रूपम्, लब्ध्वा, सम्पाद्येत्यर्थः। 'उभयेन' लाभालम्भाभ्याम् 'एते पशवो भवन्ति इति' वदन्त 'एके' इति समन्वयः। प्रयाजैरसंस्कृतत्वात् 'तानि' शिरांसि 'अनाप्रीतानि' जातानीत्यर्थः।

एतैरेवोपधाने इष्टानिष्टे दर्शयति—।"तद्ध तथाषाढेरिति। ('सौश्रोमतेयस्य') शुश्रोमती नाम काचन मुनिपत्नी, तस्या अपत्यं माषाढिर्नाम ऋषिः, तस्य। तथा सञ्ज्ञपनहृतानि शिरांसि 'उपदधुः', 'ततः' तदनन्तरं 'सः' आषाढिः क्षिप्र एव काले मृतवान् ॥ ३७ ॥

कुणपमस्त्वत्वदोषपरिहाराय हिरण्मयशीर्षोपधानं केचिद् वदन्तीत्याह-- "हिरण्मयान्यु हैके कुर्वन्तीति। यद्यपि 'अमृ-

* का० श्रौ० सू० १६ १ ३०, ३१, ३२

तेष्टका', तथापि 'न पशुशीर्षाणि' इति न तेषूपधानं युक्त मित्यर्थः ॥ ३८ ॥

"मृन्मयान्यु हैक इति । 'एते' पुरुषादयः 'पशवः' 'उत्सन्नाः' आलब्धव्यत्वात्, अतः किं मृन्मयकरण मिति, तत्राह— "यद्वै किञ्चेति । 'यत् किञ्च उत्सन्नं' वस्तु भवति, 'तस्य सर्वस्य' 'इयं' पृथिवी 'प्रतिष्ठा', नष्टं पृथिवी मन्वेतीति तस्याः प्रतिष्ठात्वम् । 'तत्' तस्मात् 'यत्र' यस्मिन् प्रदेशे नष्टाः 'पशवः' 'गताः', 'ततः' तस्मात् प्रदेशात् 'एतान्' पशून् 'सम्भराम' नेष्याम 'इति' मृन्मयाकरणे युक्तिः । "न तथा कुर्यादिति, तन्निषेधः ।

इदानीं पञ्चपश्वालम्भपक्षं सिद्धान्तयति— "यो वा एतेषा मिति । 'आवृतं' प्रयानक्रमम्, तद्विधायकं 'ब्राह्मणम्' 'च' अविद्रुष एव 'एते' पशवः 'उत्सन्नाः'। "स एतानिति । 'सः' विद्वान् । "यावदस्य वशः स्यादिति । 'अस्य' चिन्वतः पुरुषस्य 'यावत्' कर्मप्रयोगः 'वशः' 'स्यात्' स्वाधीनो भवेत्, 'स पशूनालभेत' इत्यन्वयः ।

अस्मिन्नर्थे अनुष्ठातृसम्प्रदायं प्रमाणयति— "तान् हैतान् प्रजापतिः प्रथम इति । सायकस्यापत्यं 'सायकायनः' 'श्यापर्णः' नाम 'अन्तमः' चरमः 'आलेभे'। 'अन्तरेण' प्रजापतिश्यापर्णयोरन्तरालकाले ये अनुष्ठातारः, ते 'एतानेव' पञ्च पशून् 'आलभन्ते' आलेभिरे ।

एतावत्पर्यन्तं पञ्चपश्वालम्भपक्ष उक्तः, इतः परं प्राजापत्यवायव्यपक्षौ वक्ष्येते *। तत्र पक्षा अपि समविकल्पाः ।

---

* का० श्रौ० सू० १६ १. ३६—४१ ।

तत्रेदानी मपि अनुष्ठातृभि पशुपशुालम्भ कार्यं इति मन्यन्ते, तान् प्रत्याह— "अथैतर्हीमौ द्वावेवालभ्येते इति। 'अथ' इति पक्षान्तरप्रारम्भे। 'एतर्हि' अधुना। एतच्छब्दात् कालार्थे र्हिल् प्रत्यय *। 'प्राजापत्य वायव्यश्च' इति द्वौ पशू 'आलभ्येते'। तावपि समविकल्पाविति प्रागुक्तम्। 'अत' 'तयो' एतयो पश्वो विधायक 'ब्राह्मणम्' 'उच्यते' भण्यते। "वद व्यक्ताया वाचि" †, लिटि "वचिस्वपियजादीना किति"— इति ‡ सम्प्रसारणम् ॥ ३८ ॥ ४ [२ १] ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
षष्ठे काण्डे द्वितीयेऽध्याये प्रथम ब्राह्मणम् ॥

॥ इति षष्ठकाण्डे प्रथमः प्रपाठकः ॥

---

* "द्वदमो र्हिल्"—इति पा० ५ ३ १६ सू०।

† भ्वा० प० १०० धा०।

‡ पा० सू० ६ १. १५।

अथ

द्वितीयप्रपाठके प्रथम ब्राह्मणम् ,

अपि वा

द्वितीयाध्याये द्वितीय ब्राह्मणम् ।

॥ हरि. ॐ ॥

प्राजापत्यं चरका आलभन्ते । प्रजापतिरग्निं चित्वाग्निरभवत्तद्यदेत मालभते तदेवाग्नेरन्त पर्येतीति ॥ १ ॥

श्यामो भवति । द्वयानि वै श्यामस्य लोमानि शुक्लानि च कृष्णानि च द्वन्द्व मिथुन प्रजनन तदस्य प्राजापत्यꣳ रूप तूपरो भवति तूपरो हि प्रजापतिः ॥ २ ॥

तस्यैकविꣳशतिः सामिधेन्यः । द्वादश मासाः पञ्चऽर्त्तवस्त्रय इमे लोका असावादित्य एकविꣳश एष प्रजापतिः प्रजापतिरग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैन मेतत् समिन्धे ॥ ३ ॥

यद्वैवैकविꣳशतिः। एकविꣳशो वै पुरुषो दश हस्त्या अङ्गुलयो दश पाद्या आत्मैकविꣳशः पुरुषः प्रजापतिः प्रजापतिरग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैन मेतत् समिन्द्धे ॥ ४ ॥

उभयीर्गायत्रीश्च त्रिष्टुभश्चान्वाह। तासा मुक्तो बन्धुरुक्तम्वेवान्वृचꣳ हिरण्यगर्भवत्याघार माघारयति प्रजापतिर्वै हिरण्यगर्भ प्रजापतिरग्निर्द्वादशाप्रियस्तासा मुक्तो बन्धुरुक्तम्वेवान्वृचं प्राजापत्य पशुपुरोडाशो य एव पशोर्बन्धु स पुरोडाशस्य द्वादशकपालो द्वादश मासा सव्वत्सर सव्वत्सर प्रजापतिः कद्वत्यो याज्यानुवाक्याः को हि प्रजापति ॥ ५ ॥

अथैत व्वायवे नियुत्वते। शुक्ल तूपर मालभते प्रजापति प्रजाः सृष्ट्वानुव्यैक्षत तस्मात्यानन्देन रेत. परापतत् सोऽज शुक्लस्तूपरो लप्सुदाभवद्रसो वै रेतो यावानु वै रसस्तावानात्मा तद्यदेत मालभते तदेवाग्नेरन्त पर्येति शुक्लो भवति शुक्लꣳ हि रेतस्तूपरो भवति तूपरꣳ हि रेतो व्वायवे भवति प्राणो वै व्वायुर्नियुत्वते

भवत्युदानो वै नियुतः प्राणोदानावेवास्मिन्नेतद्
दधाति ॥ ६ ॥

यद्देवैत व्वायवे नियुत्वते । शुक्लं तूपर मालभते प्रजापतिं व्विस्रस्तं यत्र देवाः समस्कुर्व्वंस्तस्य योऽस्मात् प्राणो मध्यत उदक्रामत् त मस्मिन्नेतेन पशुनादधुस्तथैवास्मिन्नय मेतद्दधाति व्वायवे भवति प्राणो वै व्वायुर्नियुत्वते भवत्युदानो वै नियुतः प्राणोदानावेवास्मिंन्नेतद्दधाति शुक्लो भवति शुक्लो हि व्वायुस्तूपरो भवति तूपरो हि व्वायुः* ॥ ७ ॥

तस्य सप्तदश सामिधेन्यः । सप्तदशो वै सम्वत्सरो द्वादश मासा. पञ्चऽर्त्तवः संव्वत्सरः प्रजापतिः प्रजापतिरग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैन मेतत् समिन्द्धे ॥ ८ ॥

यद्देव सप्तदश । सप्तदशो वै पुरुषो दश प्राणाश्चत्वार्यङ्गान्यात्मा पञ्चदशो ग्रीवाः षोडश्यः शिरः सप्तदशं पुरुषः प्रजापतिः प्रजापतिरग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैन मेतत् समिन्द्धे ॥ ९ ॥

---

* 'वायुः'—इति ग ।

उभयीर्गायत्रीश्च त्रिष्टुभश्चान्वाह । तासां मुक्तो बन्धुरुक्तम्वेवान्वच द्वादशाप्रियस्तासां मुक्तो बन्धुरुक्तम्वेवान्वच प्राजापत्यः पशुपुरोडाशोऽतो स काम उपाप्त इति ह स्माह माहित्थिर्य चरका प्राजापत्ये पशावाहुरिति ॥ १० ॥

यद्वेव वायव्यः पशुर्भवति । प्राजापत्यं पशुपुरोडाशोऽर्द्धं ह प्रजापतेर्वायुरर्द्धं प्रजापतिस्तद्यदुभौ वायव्यौ स्यातामुभौ वा प्राजापत्यावर्द्धं हैवास्य कृतं स्यान्नार्द्धमथ यद्वायव्य पशुर्भवति प्राजापत्य पशुपुरोडाशस्तेन हैवैतं सर्वं कृत्स्नं प्रजापतिं संस्करोति ॥ ११ ॥

यद्वेव वायव्यं पशुर्भवति । प्राजापत्यः पशुपुरोडाशं प्रजापतिं विस्रस्तं यत्र देवा समस्कुर्वंस्स योऽस्मात् प्राणो मध्यत उदक्रामत्तमस्मिन्नेतेन पशुनादधुरथास्यैतेन पुरोडाशेनात्मानं समस्कुर्वंस्स यत् प्राजापत्यो भवति प्रजापतिर्ह्यात्मा द्वादशकपालो द्वादश मासा संवत्सरं संवत्सरः प्रजापतिं कद्वत्यौ याज्यानुवाक्ये को हि प्रजापतिः ॥ १२ ॥

तद्यद्वपां पुरस्ताज्जुहोति । य एवायं पुरस्तात् प्राणस्त मस्मिन्नेतद्दधात्यथ यदेतेन मध्यतश्चरन्ति मध्यतो ह्यय मात्माथ यद्धविषोपरिष्टाच्चरन्ति य एवाय मुपरिष्टात् प्राणस्त मस्मिन्नेतद्दधाति शुक्लवत्यो याज्यानुवाक्या. स्युः शुक्लरूपाणा मुपाप्त्यै नियुत्वत्यो यदेवनियुत्वद्रूप तस्योपाप्त्यै ॥ १३ ॥

तदु वा ऽआहु । वपाया एव शुक्लवत्यौ स्याता मेतावद्वै पशौ शुक्ल यद्वपा शुक्लवत्यौ नियुत्वत्यौ हविषो यदेव नियुत्वद्रूप तस्योपाप्त्या ऽइति ॥ १४ ॥

यद्वेवैतं पशु मालभते । एतस्मिन् ह पशौ सर्व्वेषा पशूनाꣳ रूप यत्तूपरो लप्सुदी तत् पुरुषस्य रूप तूपरो हि लप्सुदी पुरुषो यत्तूपरः केसरवांस्तदश्वस्य रूपं तूपरो हि केसरवानश्वो यदष्टाशफस्तद्गोरूप मष्टाशफो हि गौरथ यदस्यावेरिव शफास्तदवे रूपं यदजस्तदजस्य तद्यदेत मालभते तेन हैवास्यैते सर्व्वे पशव आलब्धा भवन्त्यतो यतमदस्य कर्म्मोपकल्पेतेते वा पशव

पशव एष वा प्राजापत्य एष वा नियुत्व-
तीयः ॥ १५ ॥

त पौर्णमास्या मालभेत। अमावास्याया
मालभेतेत्यु हैक ऽआहुरसौ वै चन्द्र, प्रजापति,
स एताᳬ रात्रि मिह व्वसति तद्यथोपतिष्ठन्त माल-
भेतैव तदिति ॥ १६ ॥

तद्वै पौर्णमास्या मेव *। असौ वै चन्द्र
पशुस्त देवा' पौर्णमास्या मालभन्त यत्रैन देवा
आलभन्त तद्देन मालभा ऽइति तस्मात् पौर्ण-
मास्या यद्वेव पौर्णमास्या पौर्णमासी ह वाव
प्रथमा व्युवास तस्माद्वेव पौर्णमास्याम् † ॥ १७ ॥

तद्वै फाल्गुन्या मेव ‡। एषा ह सम्वत्सरस्य
प्रथमा रात्रिर्यत् फाल्गुनी पौर्णमासी योत्त-
रैषोत्तमा या पूर्व्वा मुखत एव तत् सम्वत्सर
मारभते ॥ १८ ॥

स वा ऽइष्ट्वैव पौर्णमासेन §। अथ पशु माल-

*, ‡ 'मेव'—इति ग 'मेव'—इति घ।

† 'पौर्णमास्याम्'—इति ग।

§ पौर्णमासेन'—इति क, ख, ग, ङ

भेत पौर्णमासेन वा ऽइन्द्रो वृत्र पाप्मानꣳ हत्वापहतपाप्मैतत्कर्मारभत तथैवैतद्यजमान पौर्ण-मासेनैव वृत्र पाप्मानꣳ हत्वापहतपाप्मैतत्कर्मा-रभते ॥ १९ ॥

तद्वा ऽउपाꣳशु भवति। एतद्वैते प्रजापति पशुभि कर्मैयेष तद्वाऽऽनद्वैवामानिरुक्त मिव तस्मादुपाꣳशु * ॥ २० ॥

यद्वेवोपाꣳशु। प्राजापत्यं वा ऽएतत् कर्म प्रजापतिꣳ ह्येतेन कर्मणारभते ऽनिरुक्तो वै प्रजा-पति ॥ २१ ॥

यद्वेवोपाꣳशु †। रेतो वा ऽअत्र यज्ञ उपाꣳशु वै रेत सिच्यते वपा पशुपुरोडाशो हविरेता-वान् हि पशु. ‡ ॥ २२ ॥

अष्टकाया मुखाꣳ सम्भरति। प्राजापत्य मेत-द्दृश्यदष्टका प्राजापत्य मेतत् कर्म यदुखा प्राजा-पत्य ऽएव तदृहन् प्राजापत्य कर्म करोति ॥ २३ ॥

---

* 'तस्मादुपांशु'—इति ग।

† 'यद्देवोपांशु'—इति ग। 'यद्वेवोपांशु'—इति ख, घ।

‡ 'पशु'—इति ग।

यद्वेवाष्टकायाम्। पर्व्वैतत् संवत्सरस्य यदष्टका पर्वैतदग्नेर्यदुखा पर्वण्येव तत् पर्व्व करोति ॥ २४ ॥

यद्वेवाष्टकायाम्। अष्टका वा ऽउखा निधिर्द्वा ऽउद्धी तिरश्ची रास्ना तच्चतुश्चतस्र उद्धास्तदष्टावष्टकाया मेव तदष्टका करोति ॥ २५ ॥

अमावास्याया दीक्षते। अमावास्यायै वा अधि यज्ञस्तायते यतो यज्ञस्तायते ततो यज्ञ जनयानीति ॥ २६ ॥

यद्वेवामावास्यायाꣳ। रेतो वा ऽएतद् भूत मात्मानꣳ सिञ्चत्युखाया योनौ यद्दीक्षते तस्मा-ऽएत पुरस्ताल्लोक करोति यद्दीक्षितो भवति त क्तं लोक मभि जायते तस्मादाहु क्त लोक पुरुषो-ऽभि जायत ऽइति ॥ २७ ॥

स यत् कनीय संवत्सराद्दीक्षित. स्यात्। अलोका इष्टका उपदध्यादिष्टका लोकानतिरिच्येरन्नथ यद्भूयसो लोकान् कृत्वेष्टका नानूपदध्याल्लोका इष्टका अतिरिच्येरन्नथ यदमावास्याया दीक्षित्वामावास्याया क्रीणाति तद्यावन्त मेव लोकं

करोति तावतीरिष्टका उपदधात्यथास्यापूर्यमाणपक्षे सर्वो ऽग्निश्चीयते ॥ २८ ॥

तदाहुः । यद्यावत्य एतस्याग्नेरिष्टकास्तावन्ति क्रयेऽहोरात्राणि सम्पद्यन्तेऽथ यान्यूर्द्धानि क्रयादहानि कथ मस्य ते लोका अनुपहिता भवन्तीति यद्वा ऽअमावास्याया दीक्षित्वा मावास्याया क्रीणाति तद्यावन्त मेव लोक करोति तावतीरिष्टका उपदधात्यथ यान्यूर्द्धानि क्रयादहानि तस्मिन्नवकाशे-ऽह्युरग्नि चिनोति को हि चिनुयान्न च सो ऽवकाशः स्याद्यावन्ति वै संवत्सरस्याहोरात्राणि तावत्य एतस्याग्नेरिष्टका उप च त्रयोदशो मासस्त्रयोदशो वा ऽएष मासो यान्यूर्द्धानि क्रयादहानि तद्या अमूस्त्रयोदशस्य मास इष्टकास्ताभिरस्य ते लोका अनुपहिता भवन्ति तत्समा लोकास्त्विष्टकाश्च भवन्ति ॥ २९ ॥

एतद् वै यैव प्रथमा पौर्णमासी * । तस्यां पशु मालभते या प्रथमाष्टका तस्या मुखाए सम्भरति

* पौर्णमासी'—इति ग ।

या प्रथमामावास्या तस्या दीक्षेत ऽएतद्वै यान्येव सम्वत्सरस्य प्रथमान्यहानि तान्यस्य तदारभते तानि च तदाप्नोत्यथात सम्पदेव * ॥ ३० ॥

तदाहुः । कथ मस्यैतत् कर्म संव्वत्सर मग्नि माप्नोति कथᳫं सवत्सरेणाग्निना सम्पद्यत ऽइत्ये-तेषा व्वै पञ्चाना पशूना चतुर्व्विंᳫंशति' सामि-धेन्यो द्वादशाप्रियस्तत् षट्त्रिंᳫंशदेकादशानुयाजा एकादशोपयजस्तदष्टापञ्चाशत् ॥ ३१ ॥

ततो याष्टाचत्वारिᳫंशत् † । साष्टाचत्वारिᳫंश-दक्षरा जगतीय वै जगत्यस्याᳫं हीदᳫं सर्व्वं जगदिय मु वा ऽअग्निरस्यै हि सर्व्वोऽग्निश्चीयते यावानग्निर्यावत्यस्य मात्रा तावत्तद् भवति ॥ ३२ ॥

यद्वेवाष्टाचत्वारिᳫंशत् । अष्टाचत्वारिᳫंशद-क्षरा वै जगती जगती सर्व्वाणि छन्दाᳫंसि सर्व्वा-णि छन्दाᳫंसि प्रजापति. प्रजापतिरग्निर्यावा-नग्निर्यावत्यस्य मात्रा तावत्तद्भवति ॥ ३३ ॥

---

* 'सम्पदेव' —इति ग ।

† '०शत'—इति ग , '०शत —इति घ ।

अथ यानि दश। सा दशाक्षरा विराड् विराडग्निर्दश दिशो दिशोऽग्निर्दश प्राणाः प्राणा अग्निर्यावानग्निर्यावत्यस्य मात्रा तावत्तद् भवति ॥ ३४ ॥

वपा पशुपुरोडाश *। तत् षष्टिः षष्टिर्मासस्याहोरात्राणि तन्मास माप्नोति मास आप्त ऋतु माप्नोत्यृतु सम्वत्सर तत् संवत्सर मग्नि माप्नोति ये च स म्वत्सरे कामा अथ यदतोऽन्यद्यदेव स म्वत्सरेऽन्नं तत्तत् † ॥ ३५ ॥

अथैतस्य प्राजापत्यस्य ‡। एकविꣳशति सामिधेन्यो द्वादशाप्रियस्तत्त्रयस्त्रिꣳशदेकादशानुयाजा एकादशोपयज तत् पञ्च पञ्चाशद्वपा पशुपुरोडाशो हविस्तदष्टापञ्चाशत्स योऽष्टापञ्चाशति कामोऽस्यैव त माप्नोति द्वावाघारौ तत् षष्टिः स य. षष्ट्यां कामोऽस्यैव तसाप्नोत्यथ यदतोन्यद्यदेव स वत्सरेऽन्नं तत्तत् § ॥ ३६ ॥

* 'पशुपुरोडाश '—इति ग ।

†, § तत्तत'—इति ग ।

‡ 'प्रजापत्यस्य'—इति ग, 'प्रजापत्यस्य'—इति क।

अथैतस्य नियुत्वतीयस्य। सप्तदश सामिधेन्यो द्वादशाप्रियस्तदेका न विंशदेकादशानुयाजा एका-दशोपयजस्तदेकपञ्चाशदपा पशुपुरोडाशो हविस्त-च्चतुष्पञ्चाशद् द्वावाघारौ द्वौ स्विष्टकृतौ तदष्टापञ्चा-शत्स योऽष्टापञ्चाशति कामोऽचैव त माप्नोति वनस्पतिस्व वसाहोमश्च तत् षष्टि' स यः षष्ट्यां कामो ऽचैव त माप्नोत्यथ यदतोऽन्यद्यदेव सव्व-त्सरे ऽन्नं तत्तदेव मु हास्यैतत् कामं संव्वत्सर मग्नि माप्नोत्येवꣳ सव्वत्सरेणाग्निना सम्प-द्यते ॥ ३७ ॥

तदाहु'*। नैतस्य पशोः समिष्टयजूꣳषि जुहु-यान्न हृदयशूलेनावभृथ मभ्यवेयाद्दारम्भो वा ऽएषो ऽग्ने' पशुर्व्यवसर्गो देवतानाꣳ समिष्टयजूꣳषि-सꣳस्थावभृथो नेदारम्भे देवता व्यवसृजानि नेद् यज्ञꣳ सꣳस्थापयानीति स वै स मेव स्थापयेदेतेन पशुनेष्ट्वा तत् प्रजापतिरपश्यद्यथैतस्याग्नेरन्तं न पर्य्यैत्तस्मात्सꣳस्थापयेद्यद्येव सꣳस्थापयति प्राणा एष

* 'तदाहु'—इति ग, घ। 'तदाहु.'—इति ङ।

पशुस्तस्य यदन्तरियात् प्राणस्य तदन्तरियाद्यदु वै प्राणस्यान्तरियात् तत एवं म्रियेत तस्मात् स मेव स्वापयेदथातो व्रतस्या मेव * ॥ ३८ ॥

तदाहुः † । नैतेन पशुनेष्ट्वोपरि शयीत न माऽंस मश्नीयान्न मिथुन मुपेयात् पूर्वं दीक्षा वा ऽएष पशुरनवक्लृप्तं वै तद्यद्दीक्षित उपरि शयीत यन्माऽंस मश्नीयाद्यन्मिथुन मुपेयादिति नेत्त्वेवैषा दीक्षा नेव हि मेखलास्ति न कृष्णाजिन मिष्टकां वा ऽएतां कुरुते तस्मादु काम मेवोपरि शयीतैतदु सर्व्वं मन्नं यदेते ‡ पशवस्तदस्याप्त मारब्धं भवति तद्यानि कानि चामधुनोऽशनानि तेषा मस्य सर्व्वेषा कामाशनं यदि लभेत मिथुनं तु नोपेयात् पुरा मैत्रावरुण्यै पयस्यायै तस्योपरि बन्धुः ॥ ३९ ॥

तदाहुः § । तद्यादेतस्मिन्यज्ञे दक्षिणां नेन्मे-ऽयं यज्ञोऽदक्षिणोऽसद् ब्रह्मणा ऽप्यादिष्टदक्षिणां

* 'मेव'—इति ग । 'मेव'—इति च ।

†, § 'तदाहु.'—इति ग, घ । 'तदाहु.'—इति च ।

‡ 'यदते'—इति ग ।

दद्याद् ब्रह्मा वै सर्व्वो यज्ञस्तदस्य सर्व्वो यज्ञो भिषज्जयितो* भवतीति न तथा कुर्यादिष्टकां वाऽएता कुरुते तद्यथेष्टकाया मिष्टकाया दद्यात्ताहृत-दमुष्यैव दद्याद्यदस्योपकल्पेत ॥ ४० ॥ १ ॥

॥ इति द्वितीयप्रपाठके प्रथमं ब्राह्मणम् [२. २.] ॥

प्रजापतिदेवत्यपश्वनुष्ठाने सम्प्रदाय दर्शयति— "प्राजापत्यं चरका आलभन्त इति। चरका नाम चरकप्रोक्तशाखाध्यायिनो महर्षय। तत्र फल माह— "प्रजापतिरग्निं चित्वेति ॥ १ ॥

तस्य पशोर्वर्णं विधत्ते— "श्यामो भवतीति। 'श्याम' शुक्ल-कृष्णवर्णद्वययुक्त पशु कार्य इत्यर्थं। तद् वर्णद्वय प्रजापति स इत्युपपादयति— "द्वयानि वै श्यामस्य लोमानीति। प्रजापते-र्लोकप्रजननसद्भावात् उक्तविधरूपद्वयसमुदायस्य प्राजापत्यत्वम्। गुणान्तर विधत्ते— 'तूपरो भवतीति। विषाणरहितस्य प्रजापते-रपि शृङ्गरूपस्योत्तमवस्तुनो राहित्यादिति तत्साम्यम्। अत्र कात्या-यन— "श्यामतूपरो वा प्राजापत्य उपदध्यात्"—इति † ॥ २ ॥

प्रजापतिदेवत्यपशुपक्षे सामिधेनीषु समिध्यमानसमिद्धवत्यो-र्धाय्योर्मध्ये "समास्त्वाग्न ऋतव"—इत्याद्या षड्सङ्ख्या ऋचो निदध्यादिति ‡, तदिद विधत्ते— "तस्यैकविंशति सामिधेन्य

---

* भिषज्जितो' भिषज्जियितो'—पाठौ च दृष्टौ डा० वेबरमहोदयेन।

† का० श्रौ० सू० १६ १ ३३।

‡ पृ० ५६, क० २५, एतद्भाष्य च द्रष्टव्यम्।

इति। प्रकृतिगत पञ्चदश, इदानीं धाय्या षट् *, उभयं एकविंशतिरित्यर्थः। सामिधेनीगतां मेकविंशतिसङ्ख्यां प्रकार-द्वयेन प्रशंसति— "द्वादश मासा इति। कण्डिकाद्वयं पूर्ववद् व्याख्येयम् ॥ ३, ४ ॥

"उभयीर्गायत्रीश्च त्रिष्टुभश्चान्वाहेति। सामिधेनीषु पूर्वं गायत्रीच्छन्दस्का भूयस्य, मध्ये त्रिष्टुभ, अन्ते च गायत्र्य, तासां प्रजापतिसम्पादनार्थं।

एतस्य सर्वस्य विधायकं ब्राह्मण मतिदिशति— "तासा मुक्तो बन्धुरुक्तम्वेवान्वृच मिति। 'बन्धु' स्तावक ब्राह्मणम् 'उक्तम्', पञ्चपशुविधिप्रकरणे, सामिधेनीषु आसाम् 'अन्वृच' प्रत्यृचम् उक्त मेव, व्याख्यातञ्चेत्यर्थ, "प्राणो गायत्र्यात्मा त्रिष्टु-बित्यादिना †, "ता एता एकव्याख्याना एत मेवाभि यथेत मेव संस्कुर्यादेत जनयेत्–इति च ‡।

अस्मिन् प्राजापत्यपक्षे उत्तराघारे मन्त्रविशेषं विधत्ते— "हिरण्यगर्भवत्याघार माघारय"–इति §। हिरण्यगर्भपदवत्या ऋचा आघारा स्रुचि, उत्तरस्या मिति सामर्थ्याल्लभ्यते ‖। "हिरण्यगर्भ समवर्त्तताग्रे"–इतिमन्त्रेणेत्यर्थं ¶। अत्र कि मय मविशेषेणोक्तो मन्त्र पूर्वस्मिन् स्रुवाघारे विनियुज्यते, उतोत्तरस्मिन् स्रुच्याघारे? इति। किं तावत् प्राप्तम्? पूर्वा-

* "षट् दध्यात् (धाय्या) – इति का० श्रौ० सू० १६ १ ३४।
†, ‡ ५१ पृ० ८ प०, ६० पृ० २७ का०।
§ का० श्रौ० सू० १६ १ ३५।
‖ हिरण्यवत्याघार माघारयतीतिवचनात्'—इति (का० श्रौ० सू० १६ १ ३५) कर्कः। ¶ वा० स० १३ ४।

घारो हिरण्यगर्भवत्या कर्त्तव्य । कुतः ? देवतासामान्यात् पूर्वाघार' तूष्णो क्रियमाणत्वात् प्रजापतिदैवत्य , हिरण्यगर्भ-मन्त्रस्यापि प्रजापतिर्देवता, "कस्मै देवाय हविषा विधेम"-इतिमन्त्रलिङ्गात् * । 'क' शब्देन प्रजापतिरभिधीयते, "को हि प्रजापति "-इतिश्रुते † । अतो मन्त्रो देवताभिधानसमर्थः पूर्वस्मिन् स्रुवाघारे एव विनियुज्यते इति प्राप्ते , ब्रूम — पूर्वाघारे नाय मन्त्र , किन्तर्हि ? उत्तराघारे, मन्त्रवत्त्व-सामान्यात् । यस्याघारस्य प्रकृतौ मन्त्रो दृष्ट , तत्रैव मन्त्रा-न्तरविधान युक्ततरम् , इतरत्र पूर्वाघारे तु पूर्वं प्रकृतौ मन्त्र-राहित्यादमन्त्रवत्ता विधेया, तद्विशेषे च गौरव स्यात् । तर्हि उत्तराघारे ऐन्द्रमन्त्रस्य विनियुक्तत्वात् कथ तत्र तद्विशेष-विधिरिति चेत्, सत्यम् । 'इन्द्र'-पदस्य प्रजापतिपरतया व्याख्यातु योग्यत्वात् , मन्त्रवत्त्वसामान्याच्च मन्त्रान्तरस्य निवर्त्तको भवति । तस्मात् उत्तराघारे एवाय मन्त्र इति सिद्धान्त ।

कात्यायनेनापि पूर्वोत्तरपक्षौ दर्शितौ— "हिरण्यगर्भ इत्यृचा स्रुवाघार , पूर्वो देवतासामान्यात् , उत्तरे तु सामान्योपदे-शाभ्याम्"-इति ‡ । पूर्व एव नापूर्वाघार , प्रकृतिलिङ्गसामा-न्यात् । न तु पूर्व प्रथम आघार , उत्तरत्र वर्ण्यमानपूर्वो-त्तरपक्षविरोधात् । ते चाधिकरणे पूर्वोत्तरपक्षवद् योज्ये ।

---

* हिरण्यगर्भ समवर्त्तताग्रे भूतस्य जात पतिरेक आसीत् । स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम"—इति ।

† शत० ब्रा० ४ ५ ६ ४ , ६ २ २ ५ १२ (८७ ८६ पृ०), ४. ३ ४ , तै० स० १ ७.६ ६ ।

‡ का० श्रौ० सू० १६ १. ३५ , ३६ , ३७ ।

"तुल्य मन्यत् सर्वेषु"-इति * यत् कात्यायनेन दर्शितम्, तदिद माह-- "द्वादशाप्रिय इति। एतासा माप्रीणा मपि सङ्ख्यास्तावक ब्राह्मण प्रजापतिसङ्ख्यारसङ्ख्यानजननलक्षणैकार्थ-व्याख्यान मातिदिशति-- "तासा मुक्तो बन्धुरिति। 'बन्धु' ब्राह्मणम्। प्राजापत्यपशुपुरोडाशस्य तत्पशुब्राह्मण मतिदिशति— "य एव पशोर्बन्धु स पुरोडाशस्येति। एवं ह्येतत्— "प्राजापत्य चरका आलभन्ते प्रजापतिरग्नि चित्वाग्निरभवत् तद्यदेत मालभते तदेवाग्नेरन्त पर्येति"-इति †।

'क' पदयुक्ताना प्रजापतिदेवत्यत्व दर्शयति— "को हि प्रजा-पतिरिति ॥ ५ ॥

वायव्यपशुपत्न विधत्ते— "अथैतं वायव इति। 'नियुत्वते' नियुत्वद्गुणकाय वायवे 'शुक्ल' वर्णत, 'तूपर' विषाणरहित, आलभ्यत ‡। "प्राजापति प्रजा सृष्ट्वानुव्यैक्षतेत्यादिक "तूपरो हि वायुरित्यन्तं ब्राह्मण § पशो शुक्लत्वतूपरत्वयोर्नित्यत्वाद् वायु-देवत्यस्यैव स्तावकम्। "तूपरो लप्सुदीति। 'लप्सुदी' ललाटे शुक्लवर्ण इत्यर्थ ‖॥ ६ ॥ ७ ॥

अस्य पशो सप्तदश सामिधेनीराह— "तस्य सप्तदशेति। कात्यायनोऽपि— "वायवे नियुत्वते श्वेतलप्सुदी वेदध्यात्"-इति।

* का० श्रौ० सू० ६ १ ३३। 'सर्वेषु त्रिष्वपि पशेषु'—इति वृत्ति०।
† इहैव पुरस्तात् (१ ब्रा० १ क० ८६ पृ०) द्रष्टव्यम्।
‡ श्वेत' श्वेतवर्ण', लप्सुदी लप्सुद कूर्च तद्वान्'— इति कर्क ।
§ इहैव ८७ पृ० १४ पं०—८८ पृ० ६ पं० द्रष्टव्यम्।
‖ का० श्रौ० सू० ६ १ ३८।

सप्तदशसङ्ख्यां मासर्तुरूपसंवत्सरात्मना स्तौति— "सप्तदशो वै संवत्सर इति ॥ ८ ॥

प्रकारान्तरेण ता मेव सङ्ख्यां प्रशंसति— "यद्वेव सप्तदश सप्तदशो वै पुरुष इति । सप्तदशत्व मेव विभज्य दर्शयति— "प्राणा इति । "चत्वार्यङ्गानीति । बाहुद्वय पादद्वय मित्यर्थः । 'आत्मा' मध्यदेश । 'ग्रीवा'–इति बहुवचन कण्ठगतधमनि-बहुत्वापेक्षम् ॥ ९ ॥

"उभयीर्गायत्रीरिति । सामिधेन्याप्रीस्तावकं ब्राह्मण पूर्व-वत् । अत्र वायव्यपशौ प्राजापत्यपशुकरणं प्रशंसति— "अत्रो ह काम उपास इतिह स्माहेति । य काम प्राजापत्ये पशौ आहुर्वेदवादिन , 'स' तादृश 'काम' 'अत्रो' अत्रैव प्राजा-पत्ये पुरोडाशे 'उपास' 'इति' 'माहित्थि' नाम ऋषि-रुवाच ॥ १० ॥

"यद्वेव वायव्य पशुर्भवतीति । 'वायु' हि 'प्रजापते' 'अर्धम्' अर्धभाग , सूत्रात्मरूपत्वात् । 'प्रजापति' स्वय मेव 'अर्धम्' अर्धभाग , तत्र यदि पशुपुरोडाशौ 'उभौ' अपि 'वाय-व्यौ' वायुदेवत्यौ स्याताम् , 'उभौ वा प्राजापत्यौ' , तर्हि 'अस्य' प्रजापते 'अर्धम्' एव तत् 'कृतम्' सस्कृत 'स्यात्', न तु कृत्स्नः प्रजापति , उभयात्मकत्वात् तस्येति । एकदेवत्यपशुपुरोडाश-करणे अर्धं तत् कृत भवेदिति भाव , उभयोर्भिन्नभिन्नदेवत्ययो. करणे सर्वं प्रजापति सस्कृतवान् भवति * । निगदसिद्ध मन्यत् । एतस्य प्राजापत्यपुरोडाशस्य कात्यदयुक्ते याज्यानुवाक्ये विद्यते—

* का० श्रौ० सू० १६ १ ३६ ।

"कइत्याविति * । 'क'-शब्दस्य प्रजापतिवाचकत्व माह— "को हीति ॥ ११, १२ ॥

"तद्यद्वपा पुरस्ताज्जुहोति"–इत्यादेरय मर्थ ,— पूर्वं वायव्य-पशोर्वपायागेन, मध्यत प्राजापत्यपुरोडाशाचरणेन, पश्चात् पश्वङ्गयागेन, उभयत प्राणान्, मध्ये आत्मान च निश्चितवान् भवतीति ।

वपाहविषोर्नियुत्वत्पदयुक्ता याज्यानुवाक्या विधत्ते— "शुक्र-वत्य इति † ॥ १३ ॥

अथ शाखान्तरानुसारेण वपाया एव 'शुक्र'-पदयुक्ते याज्यानु-वाक्ये, पशुहविषस्तु 'नियुत्वत्' पदयुक्ते याज्यानुवाक्ये इति दर्श-यति— "तदु वा आहुरिति । पूर्व प्राजापत्यपुरोडाशस्य कत्पद-युक्ते याज्यानुवाक्ये उक्ते इति वयाणा वपापुरोडाशहविषां भिन्ना याज्यानुवाक्या इत्यर्थ । तदुक्त कात्यायनेन— "प्राजापत्य पशुपुरोडाशो द्वादशकपाल उभयो, कइत्यौ याज्यानुवाक्या प्राजापत्यस्य, शुक्रवत्यौ वायव्यस्य, वपाया वा"–इति ‡ ॥ १४ ॥

पूर्वं पुरुषादय पञ्च पशव उक्ता, अत्र त्वेक एव वायव्य, तत् कथ मेकेन पशुना सर्वयागसाध्य फल लभेत ? अत पञ्चपशुपक्षस्वीकार एव युक्त इति शङ्कां व्युदस्यन् एकस्यापि वायव्यस्य पञ्चपशुरूपता दर्शयति— "यद्वेवैत पशु मालभते, एतस्मिन् ह पशौ सर्वेषां पशूना रूप मिति । प्रागुक्त'

* का० श्रौ० सू० १६ १ ४० ।

† का० श्रौ० सू० १६ १ ४१ ।

‡ का० श्रौ० सू० १६ १ ३६, ४०, ४१ ।

पञ्चपश्वादिपक्षाणा मन्यतम पक्ष इच्छया कर्त्तव्य इत्याह—
"अतो यतमदस्य कर्मोपकल्पेतेति ।

तान्येव रूपाणि योजयति— "यस्तूपरो लपुदीति । 'केसरा.'
श्मश्रुरोमाणि ॥ १५ ॥

पश्वालम्भकाल विधत्ते— "त पौर्णमास्या मालभेतेति । तच्छब्द.
पूर्वपरामर्शार्थ । वायव्य पौर्णमास्या मालभेत एतदुपलक्षणम् ,
सर्वानपि पञ्च पशून् प्राजापत्य वायव्य वा पौर्णमास्या मालभेते-
त्यर्थ । अत एव कात्यायनेन सर्वशेषतया पञ्चपशुपक्षादौ
सूत्रितम्— "उत्तरस्या फाल्गुन्या पौर्णमासेनेष्ट्वा पञ्च पशूनाल-
भते' -इति * ।

अत्र केषाञ्चित् पक्ष सोपपत्तिक मनुवदति— "अमावस्याया
मालभेतेत्यु हैक आहुरिति † । चन्द्रस्य प्रजापतितादूप्य प्रागुक्तम् ,
चन्द्रमा मनसो जात , मनश्च प्रजापति , तदेतयो कार्यकार-
णयोरभेदोपचारेणेति । स 'चन्द्र ' 'एता रात्रिम्' । अमा-
वास्यारात्री 'इह' च लोके ओषध्यात्मना 'वसति', तस्मात्
'यथा' येन प्रकारेण 'उपतिष्ठन्त' चन्द्रम् 'आलभेत', 'एव'
'तत्' पश्वालम्भनम् । अमावास्याया पश्वालम्भश्चन्द्रालम्भसमान
इति प्रशस्त इत्यर्थ ॥ १६ ॥

पौर्णमास्या मेवालभेतेति सिद्धान्तयितु पुनरनुवदति—
"तद्वै पौर्णमास्या मेवेति । "असौ वै चन्द्र पशुरित्यादेरय मर्थ —
वस्वादयो 'देवा ' पशुरूप चन्द्र पौर्णमास्या मालभ्य , प्रति-

---

* अदृश्विषान्'—इति तत्र तच्छेष । का० श्रौ० सू० १६ १ ५ ।

† का० श्रौ० सू० १६ १ ७ । 'सा च मासामावास्या सन्निधानाद्
गृह्यते'—इति तत्र कर्क ।

पदादितिथिषु एकैकां कलां प्राप्नोतीति प्रसिद्धम्, अत एवा-मावास्याया मेककलावशेषत्वात् पुनस्तं वर्धयन्ति। अत्र तैत्ति-रीयकम्— "घ्नन्ति वा एतं पूर्णमास आ अमावास्याया प्याय-यन्ति"–इति *। 'तस्मात्' यथापीदानीं मनुष्याणां 'यत्र' यस्मिन् काले 'देवा' पशु मालब्धवन्त, तस्मिन्नेव काले पशु-रालब्धव्य इति "प्रथमा व्युष्टावेति ॥ १७ ॥

"तद्वै फाल्गुन्या मिवेति। 'एषा' 'संवत्सरस्य' सर्वासां रात्रीणां 'प्रथमा' आदिभूता 'रात्रि', या उत्तरफाल्गुनीनक्षत्रयुक्ता 'पौर्ण-मासी', 'या पूर्वा' 'एषा' संवत्सरस्य 'उत्तमा' अन्त्या रात्रि। तैत्तिरीया आमनन्ति— "एषा वै जघन्या रात्रि संवत्सरस्य, यत् पूर्वे फाल्गुनी०—० एषा वै प्रथमा रात्रि संवत्सरस्य, यदुत्तरे फल्गुनी"–इति †। अतोऽस्या मुत्तरस्यां फल्गुन्यां पौर्णमास्यां पश्वालम्भेन संवत्सरादौ उपक्रान्तवान् भवती-त्यर्थं ॥ १८ ॥

पश्वालम्भ पूर्णमासे कर्त्तव्य इत्युक्तम्, तत्र नित्यपौर्ण-मासेष्टिकरणानन्तर कर्त्तव्य इत्याह— "स वा इष्ट्वैव पौर्णमासे-नाथ पशु मालभेतेति।

पौर्णमासयागानन्तर्ये पशुयागस्य सदृष्टान्त प्रतिपादयति— "पौर्णमासेन वा इन्द्रो वृत्र पाप्मान मिति। अत्र कात्यायन — "वैश्वानर पशुपुरोडाश उपांशु, पशुदेवता च"–इति ‡। 'उपांशु' करणवदशब्दमन प्रयोग मित्युक्तलक्षणम् ॥ १९ ॥

---

* तै० सं० २ ५ २ (५) ७।

† तै० ब्रा० १ १ २ ८।

‡ का० श्रौ० सू० १६ १ २५, २६।

तदिदं विधत्ते— "तद्दा उपांशु भवतीति । तच्छब्दो न पश्वनुष्ठानं परामृशते। उपांशुत्वं प्रतिपादयति— "एतद्वै प्रजापति पशुभिरिति। पूर्वं 'प्रजापति' चयनाख्यं 'कर्म' 'पशुभि' 'इयेष' इच्छति स्म। करिष्यमाणं कर्म 'यत्' यस्मिन् पश्वनुष्ठानकाले 'अनद्दा' अप्रत्यक्षम् 'इव' 'आस'। साकल्येनानुष्ठितत्वाद् बीजरूपत्वाच्चाप्रत्यक्षत्वम्। तदेवाह — "अनिरुक्त मिति। इदं कर्म इयदितिकर्त्तव्यतायुक्त मिति निर्वक्तु मयोग्यम् ॥ २० ॥

उपांशुत्वं प्रशंसितु मनुवदति— "यद्वेवोपांशु प्राजापत्यं वा एतदिति। 'एतत्' पशुकर्म 'प्राजापत्यं' प्रजापतिसम्बन्धि। एतावताप्यस्य कर्मणोऽनिरुक्तत्वं कथ मित्याह— "अनिरुक्तो वा इति। प्रजापतेरपि सर्ववस्तुरूपत्वात् अय मेतावानिति कर्मणस्ताद्रूप्यम् ॥ २१ ॥

प्रकारान्तरेणोपांशुत्वं प्रशंसति— "यद्वेवोपांशु रेतो वेति। 'अत्र' पशौ यज्ञे 'रेत' रेतोभूत बीजरूपत्वात्। यज्ञे पशुव्यतिरिक्तान्यन्यान्यङ्गानि सन्ति, तत् कथ पशौ यज्ञो बीजभूतस्तिष्ठतीति तत् समर्थयते— "वपा पश्विति। 'वपा', पशुपुरोडाशहवीरूप पशु', 'एतावान्' एव यज्ञ इति 'पशु' यज्ञबीजात्मना तिष्ठतीत्यर्थं ॥ २२ ॥

अग्निधारणार्थं मुखासम्भरणं विधत्ते— "अष्टकाया मुखा सम्भरतीति। अष्टकानामाष्टमी, तस्या मुखा विदध्यात्। पूर्वं फाल्गुनपौर्णमास्या पश्वालम्भ उक्त, तस्या बहुलाष्टम्या मुखार्थं मृत्तिकाहृढवल्मीकवपादिद्रव्यसम्भरणं मित्यर्थं। कात्यायनोऽपि— "उखासम्भरण मष्टम्याम्'—इति *। उखा चोपलक्षणम्,

* का० श्रौ० सू० १६ २ १ (फाल्गुनबहुलाष्टम्याम्')।

अषाढाद्यपि अनया क्रियया सम्भ्रियत एव। अष्टम्या मुखासम्भ-रणं प्रशंसति— "प्राजापत्य मेतदिति। अष्टमीदिवसस्य अधि-देवता प्रजापतिरिति तदाह— "प्राजापत्य मिति। 'उखा' इति 'यत्' अस्ति, 'तत्' 'प्राजापत्यं कर्म', प्रजापत्यात्मकोऽग्निः, तद्धारणार्थकत्वात्। प्राजापत्योऽग्निः, तत्सम्बन्धि 'अहन्' अष्टी-त्यर्थः। "सुपां सुलुक्०" * ॥ २३ ॥

पुनः प्रशंसितु मनुवदति— "यद्वेवाष्टकाया मिति। 'एतत्' अहः अष्टम्याख्यम्, 'संवत्सरस्य' 'पर्व' सन्धिस्थानीयम्, यथा-ङ्गुले पर्व सन्धिस्थानीय मेवम्। तत् पक्षस्य अन्तात् अष्टमी मध्येति पर्वरूपा भवति, तद्द्वारा संवत्सरस्यापीति, 'अग्ने' अप्येषा 'उखा' 'पर्व', सन्धिस्थानत्वात्, अत्र ह्यग्निः सन्धीयते ॥ २४ ॥

अथाष्टम्यां मुखासम्पादनं मष्टकानामसाम्याद्युक्त मिति तत् पुनः प्रशंसति— "यद्वेवाष्टकाया मष्टका वा उखेति। अष्टका-नामाष्टसङ्ख्या भवतीति तदष्टसङ्ख्यावत्त्वं मुखाया दर्शयति— "निधिर्द्वौ उद्धी इति। 'निधि' नाम उखाया प्रथमं मृत्पि-ण्डस्य प्रथनेन अग्निधारणार्थोऽधस्तात्प्रदेशः। 'द्वा उद्धी', उद्धि' नाम प्रथितमृत्पिण्डस्योपरि प्रक्षिप्त अन्यो मृत्पिण्ड, तौ द्वौ। 'रास्ना' नाम उखाकण्ठलग्ना 'तिरश्ची' तिरःस्थाना वृत्ता-कारा †। एवं निध्यादिचतुष्टयम्। 'अङ्गी' प्रतिदिशं मेकैक

* पा० सू० ७ १ ३९।

† 'विहृतीये उत्तरे वर्त्तिं सर्वत करोति"—इति। 'उखाया उत्तरभागस्योत्तरे उपरि वर्त्तमाने तृतीये भागे सर्वासु दिक्षु मृन्मयीं वर्त्तिं वर्त्याकारां रास्नां करोति' इति तत्र (का० श्रौ० सू० १६ २ १०) कर्काचार्याः।

वर्त्तिपर्यन्ता 'चतस्र' आश्रयभूता, ताश्चतस्र। एवम् 'षष्ठी' उखाया सम्पन्ना *। अतोऽष्टम्या मष्टकाकरण युक्त मित्यर्थ ।

उत्तरत्र पञ्चमाध्याये †— "मृत्पिण्ड मुपादत्ते"–इति प्रक्रम्य, "तम् प्रथयति वसवस्त्वेति, "अथ हैष लोके निधि"– इति प्रथमस्य पृथिवीरूपतोक्ता ‡। "अथ पूर्वं मुद्धि मादधाति ०—० अथोत्तर मुद्धि मादधाति"–इति §, 'अथ तिरश्चीऽराश्ना पर्यस्यति ०—० अथ चतस्र ऊर्द्धी करोति"–इति ‖। अत्र कात्यायन — "ऊर्द्धास्तूष्णीं प्रतिदिश चतस्रोऽपरा वर्त्ति प्राप्ता"–इति ¶ ॥ २५ ॥

चयनसहितस्य सोमयागस्य दीक्षाकाल विधत्ते— "अमावास्याया दीक्षत इति। फाल्गुनामावास्यायां दीक्षा कुर्यात्। सूत्रितञ्च— "दीक्षामावास्याया मामावास्येनेष्ट्वेति **। अमावास्यासम्बन्धीष्टिकरणादनन्तर मेव दीक्षा कर्त्तव्या, पौर्णमास्योपक्रमाद् दर्शयागेन तत्परिसमाप्तेरवकाशत्वादित्यभिप्राय। "अमावास्यायै वा अधीति। अधि पञ्चम्यर्थानुवादी। 'यत्र' चन्द्रमा, 'क्षायते' विस्तार्यते, पौर्णमास्यां देवैरालब्धस्य

* निधि उङ्खी द्वौ राश्ना वर्त्तयश्चतस्र इत्यष्टौ

† चतुर्थाध्याये'–इति च-पाठ।

‡ इहैव काण्डे उपरिष्टात ५ अ० २ ब्रा० १, ३ क।

§ इहैवोत्तरत्र ५ अ० २ ब्रा० ४, ५ क०।

‖ इहैवोत्तरत्र ५ अ० २ ब्रा० ११—१४ क०।

¶ का० श्रौ० सू० १६ ३ ३१।

** का० श्रौ० सू० १६ ४ २७।

चन्द्रस्य अमावास्याया माप्यायनस्योक्तो । 'यत' यस्मात् दिशा-यज्ञा (१) विस्तारितम् , तस्मात् अह मपि 'यज्ञम्' उत्पादयेय मिति । यद्वा , यज्ञपदेन दर्शेष्टि , दर्शपूर्णमासौ हि सर्वस्या इष्टे प्रकृतिभूताविति । तस्मादस्या उपरि 'यज्ञस्तायते' । "तनो-तेर्यकि"–इति * नलोपे "अकृत्सार्वधातुकयो"–इति † दीर्घे क्रते 'तायते'–इति रूपम् ॥ २६ ॥

प्रकारान्तरेण दीक्षाकरणं प्रशंसति— "यद्देवामावास्याया रेतो वा एतदिति । 'दीक्षते' यजमान इति 'यत्', 'एतत्' ज्ञखारूपाया 'योनौ' 'रेतोभूत मात्मान' सिक्तवान् । दीक्षा-करण मन्युत्पादनात् प्रागवस्थेति रेतस्सेकात्मकत्व मित्यर्थ । 'यत्' यदा 'दीक्षित' प्राप्तदीक्षो 'भवति', तदा तस्मै रेतो-रूपत्वेनोत्पत्स्यमानायाग्नये 'पुरस्तात्' पूर्व 'लोक' स्थान करोति, स्थाने निष्पन्ने पश्चात् अग्निर्जायते । अय मर्थ ,— दीक्षाप्रारम्भो-ऽग्नेरुत्पत्तिप्रागवस्था , तस्मात्मिरेव जनिष्यमाणस्याग्ने स्थान-करण मिति स्थानसम्पादनानन्तर मुत्पत्ति लोकप्रसिद्धया दृढ-यति— "तस्मादाहु क्रत लोका मिति ॥ २७ ॥

साग्निके क्रतौ "संवत्सरभृत मेव चिन्वीत"–इत्याम्नानात् ‡

* पा० सू० ६ ४ ४४ ।

† पा० सू० ७ ४ २५ ।

‡ उपरिष्टात् द्रष्टव्यम् (१० का० २ अ० ६ ब्रा० ८ क०) । "तयो-र्विभाग माह साग्निके क्रतौ संवत्सर दीक्षा आम्नाता;— 'संवत्सर चिन्वीतेति (शत० ब्रा १० २ ६ ८), पवित्रे चतस्रो दीक्षा आम्नाता 'पवित्रश्चतुर्दीक्ष'–इति (का० श्रौ० सू० १५ १ ४) —इति च का० श्रौ० १६ ६ ६ सूत्रे कर्क ।

न्यूनातिरेकाभावेन संवत्सरपर्यन्त दीक्षा कार्य्येति सिद्धान्त-यितु न्यूनातिरेकपक्षयोर्दोष मुपन्यस्यति— "स यत् कनीय' सवत्सरादिति। अग्निस्तावत् सवत्सरात्मक, तादृशस्याग्नेरव-यवा यजुष्मत्य इष्टका षष्ट्युत्तरत्रिशतसङ्ख्याका इति दशमे काण्डे वक्ष्यते *। तत्र दीक्षाया सवत्सरादर्वाक्त्वे कतिपयाना मिष्टकाना माधारभूतकालराहित्यादधिका भवन्तीति प्रदेश-रहिता इष्टका एवोपहिता हितवान् भवतीति। एव तर्हि एतद्दोषपरिहाराय दीक्षायां वर्षाधिक्ये इष्टका न्यूना इति लोका अतिरिक्ता भवन्तीति सोऽपि नेष्टव्य ॥

इष्टकाकाल मनुवदति— "अथ यदमावास्याया दीक्षित्वामावा-स्याया क्रीणातीति। प्रथमाया फाल्गुनामावास्यायां 'दीक्षित्वा', तत कतिदिवस दीक्षितधर्मानाचरन् पुन फाल्गुनावास्यायां राजान सोम 'क्रीणाति', अतो न्यूनाधिकभावो न स्त। इष्टकातिरेको लोकातिरेको वा नास्तीत्यस्मिन् पक्षे गुणान्तर दर्शयति— "अथास्यापूर्यमाणपक्ष इति। दीक्षानन्तर राजक्रये उपसद्याग, तत्र हि अनूपसद मग्नि चिनोतीति उपसत्स्वग्नि-चयन स्यात्, तच्चयनं शुक्लपक्षे सम्पद्यत इति गुण ॥ २८ ॥

एव दीक्षाया सवत्सरकालीनत्वेनेष्टे कालसाम्ये सिद्धान्ते-ऽपि वेदवादिना कालविषया मधिका माशङ्का दर्शयति— "तदाहुर्यथावत्य एतस्येति। यद्यपि प्रथमफाल्गुनामावास्याया दीक्षित्वा, आगामिफाल्गुनामावास्याया सोमक्रयावधिरूपवत्सर-

* "षष्टिश्च त्रीणि च शतानि परिश्रित, षष्टिश्च त्रीणि च शतानि यजुष्मत्य,'—इति १० का० ५ अ० ४ ब्रा० ५ क० ।

लोकाः अन्यवयवभूतेष्टकाना कालरूपाधाररात्रित्य माधिक्य वा नास्ति, तथापि अयादनन्तराण्यहानि उपसदर्थानि विद्यन्ते, तत्र कथ मिष्टकाभिर्यजमानस्य लोका उपहिता भवन्तीति प्रश्न ।

"यद्वा अमावास्याया दीक्षित्वेत्यादिपरिहारवाक्यस्याय मथ — दीक्षादिक्रयकालपर्यन्तो यावान् कालरूपो लोकः, तावत्य इष्टका अभूवन्निति तावदविवादम् । यदि तस्मादूर्ध्वानि यान्यहानि, सोऽवकाशोऽध्वर्योरग्निचयनस्य । यदि तान्यहानि चयन कालो न भवेत्, तर्हि 'क्वो हि' कुत्रावकाशे 'चिनुयात्' ? अवकाशस्याभावात् । अन्येष्वहस्सु इष्टकोपधान नास्तीति न मन्तव्य मिति । "यावन्ति वै सवत्सरस्याहोरात्राणि"-इत्यादिना क्रयोत्तरकालेऽपीष्टकोपधान मस्तीत्याह । सवत्सरधारणात् तद्रूपोऽग्निरित्युक्तम्, तत्र इष्टका अन्यवयवा इति च, अत सवत्सरस्य यावन्ति दिनानि, तावत्य इष्टका उपहिता इत्युक्ते सवत्सरे त्रयोदशमासस्यापि सम्भवात् तत्सङ्ख्यया इष्टकोपधानम् । अतस्त्रयोदशमासरूपाणि क्रियोत्तराण्यहानि तत्सङ्ख्याकाभिरिष्टकाभिर्यजमानलोका उपहिता भवन्तीत्यनेन यावन्तो लोकास्तावत्य इष्टका उपहिता इत्यर्थ ॥ २९ ॥

पञ्चालभ्योखासम्भरणदीक्षाकाला ये उक्तास्तेषां प्राथम्य मुपजीव्य प्रशसति—"एतद्वै यैव प्रथमा पौर्णमासीति ।

अथ पशुकर्मण सवत्सररूपाग्नेश्च सङ्ख्यासम्पत्ति दर्शयितु प्रतिजानीते— "अथात सम्पदेवेति । 'सम्पत्' सम्पत्ति, सङ्ख्यासाम्यम्, तत् पशुकर्माग्न्योर्दर्शयिष्यत इत्यर्थ ॥ ३० ॥

"तदाहु' कथ मस्यैतत् कर्माप्नोति । अग्नि संवत्सरात्मक, तम् 'कथ मेतत् कर्माप्नोति' । अत्रानुपपत्ति' स्वय मेव दर्शयति—

"कथ संवत्सरेणेति । संवत्सररूपेण 'अग्निना' सह 'कथ सम्पद्यते' सङ्ख्यात कथ सम्पन्न भवेदिति प्रश्नार्थः ॥

पञ्चपशुप्राजापत्यवायव्यरूपपशुत्रयेऽपि सम्पत्ति दिदर्शयिषु पञ्चपशुत्वे प्रथम दर्शयति— "एतेषा वै पञ्चाना पशूना मिति । तस्मिन् यज्ञे 'सामिधेन्य चतुर्विंशति' । उक्ता प्रकृति गता पञ्चदश, "समास्त्वाग्ने ऋतव"—इत्याद्या मध्ये विहिता नवेति चतुर्विंशति । 'द्वादश आप्रिय'। "ऊर्ध्वा अस्य समिधो भवन्ति"—इत्याद्या आप्रीसञ्ज्ञका प्रयाजयाज्या द्वादशोक्ता *। 'एकादश अनुयाजा'। 'एकादश उपयज' उपयजो नाम पशुगुदहोमा । तदाहापस्तम्ब — "एकादशधा तिर्यक् छित्त्वासम्भिन्दन्नपर्यावर्त्तयन्ननूयाजाना वषट्कृते वषट्कृत एकैक गुदकाण्ड प्रतिप्रस्थाता हस्तेन जुहोति"—इति †। एता सर्वा मिलित्वा 'अष्टापञ्चाशत्' सङ्ख्या सम्पन्ना ॥ ११ ॥

अस्तु, प्रकृते कि मायात मित्याह— "ततो याष्टाचत्वारिंशदिति । उक्ताया मष्टापञ्चाशत्सङ्ख्याया मध्ये दश सङ्ख्या हित्वा अवशिष्टा अष्टाचत्वारिंशत्सङ्ख्या, तावत्सङ्ख्याक्षरजगतीच्छन्दोरूपा, जगत्यपि हि द्वादशाक्षरपादेति पादचतुष्टये उक्तसङ्ख्या भवति । अस्या भूमौ सर्वं जगत् प्रतिष्ठित मिति भूमिरपि जगतीशब्दवाच्या, सैव हि सर्वाग्निचयनाधिकरण मिति आधाराधेययो-रभेदोपचारेण भूमिरेव अग्निशब्दवाच्या । अग्निर्यावत्परिमाण-

* पुरस्तात (७४—८० पृ०) द्रष्टव्या ।

† आप० श्रौ० सू० ७. २७ ११ । "समुद्रं गच्छ स्वाहेत्येतै-र्मन्त्रै"—इति तत्सूत्रशेष ।

वचन , अस्याग्नेर्मांसावयवो यावती यत्परिमाण , तत्सम-सङ्ख्याक तावदग्नि तदवयवसङ्ख्याक भवति ॥ ३२ ॥

प्रोक्ताया एव सङ्ख्याया प्राजापत्यात्मना सम्पत्ति प्रश-सति— "यद्वेवाष्टाचत्वारिंशदिति । पूर्ववद् व्याख्येयम् ॥ ३३ ॥

अवशिष्टा दशसङ्ख्या प्रशसति— "अथ यानि दश सा दशा-क्षरेति । 'विराट् अग्नि ' अन्नात्मकत्वात् । अग्निर्विराट् अन्नम् इति श्रुते विराजोऽन्नत्वम् * । अग्नेर्दिगात्मकत्व प्रागादि-दिक्षु विभज्योपधीयमानत्वात् । प्राणापानादय पञ्च , नाग-कूर्मकृकलदेवदत्तधनञ्जयाख्या पञ्चेति 'दश प्राणा ' । यद्वा , प्राणा दश इन्द्रियाणि । अग्ने प्राणात्मकत्वम् , हिरण्यगर्भात्मक-त्वात् । "यावानग्निरित्यादि पूर्ववत् ॥ ३४ ॥

एव पञ्चपश्वपचेऽष्टापञ्चाशत सङ्ख्या मग्न्यात्मना स्तुत्वा सव-त्सराग्निना सम्पत्ति वक्तु सङ्ख्यान्तर दर्शयति— "वपापशुपुरो-डाश इति । 'वपा' वैश्वानर , 'पशु पुरोडाश ' इति द्वौ । एताभ्यां सह षष्टिसङ्ख्या जाता । 'मासस्य' सवत्सरावयवभूतस्य षष्टिसङ्ख्यानि अहोरात्राणि विद्यन्ते , तत् षष्टिसङ्ख्याक मास तावत्सङ्ख्याक महोरात्र माप्नोति । 'आप्न ' सम्पन्न 'मास ' स्वावयविनम् 'ऋतुम्' 'आप्नोति' , ऋतुर्हि मासद्वयात्मक । 'ऋतु ' अपि 'सवत्सरम्' आप्नोति , ऋतुषट्कात्मको हि सव-त्सररूपोऽग्निरिति प्रागुक्तम् । अत सामिधेन्यादि वपापशुपुरो-

---

* 'अग्नि मन्यन्ति ०—० अन्न विराट'—इत्यादि (तै० ब्रा० १ ६ ३ ३) अन्न विराट् , विराजैवान्नाद्य मवरुन्धे"—इत्यादि च (तै० ब्रा० १, ८ २ २) द्रष्टव्यम् ।

भागान्तगता षष्टिसङ्ख्या संवत्सररूपात्मना सम्पन्नेति सर्वान् संवत्सरमध्यवर्तिन कामानाप्नोति। न चास्मिन् कर्मणि अन्नानि बहूनि सङ्ख्येयानि विद्यन्ते, तत् कथं षष्टिसङ्ख्योत्युक्त मत आह— "अथेत्यादि। अथेति प्रश्ने। 'अत' उक्तसङ्ख्यात 'अन्यत्' 'यत्' अस्ति, 'तत्' 'संवत्सरे' विद्यमानम् 'अन्नम्' एव 'तत्' ॥ २५ ॥

एवं पञ्चपशुपक्षे सम्पत्ति दर्शयित्वा प्राजापत्यपशुपक्षे दर्शयति— "अथैतस्य प्राजापत्यस्येति। अग्ने 'एकविंशति सामिधेन्य' हवि, पशुहृदयादिरूप मित्यर्थ। एवं मष्टा-पञ्चाशत् सम्पन्ना। तत्र पूर्वोक्त फल मतिदिशति— "स यो-ऽष्टापञ्चाशति काम इति। अत्रापि संवत्सराग्निना सम्पत्ति वक्तु सङ्ख्यान्तर समुच्चिनोति— "द्वावाघाराविति। स्रुवा-घार स्रुच्याघारश्चेत्यर्थ। एवं षष्टिसङ्ख्याया सम्पन्नाया पूर्वोक्तषष्टिफल मतिदिशति— "स य षष्ट्या कामोऽस्त्येव त मिति॥ २६ ॥

वायव्यपशुपक्षे सम्पन्ने सम्पत्ति दर्शयति— "अथैतस्य नियुत्वतीयस्येति। "द्वौ स्विष्टकृताविति। पशुपुरोडाश स्विष्ट-कृत्, पश्वङ्गस्विष्टकृच्चेति द्वय मित्यर्थ। "वनस्पतिश्च वसा-होमश्चेति। पृषदाज्यद्रव्यको वनस्पतियाग स्विष्टकृत प्रागनुष्ठेय, हविषो याज्याया अर्धर्चे प्रतिप्रस्थात्रा कर्तव्यो वसाहोम। अत्रापि फलद्वयवाक्य पूर्ववद् योज्यम् ॥ २७ ॥

पशुनुष्ठानस्य चयनकर्मादित्वात् तदवसान कर्तव्य, देवताविसर्गरूपसमिष्टयजुर्होम समाप्तिरूपावभृथश्च न कर्तव्या-विति केषाञ्चित् पक्ष सोपपत्तिक मुपन्यस्यति— "तदाहु

र्मैतस्य पशोरिति। पञ्चपशुपक्षेऽपि "अजेन चरति"–इत्युक्ते *
अजस्य वा प्राजापत्यस्य वा वायव्यस्य वा पशोरित्यर्थ । 'अग्ने'
अग्निचयनकर्मणि 'एष' उक्त 'पशु' पशुयाग 'आरम्भ'
कर्मोपक्रम, आदावनुष्ठीयमानत्वात्। 'समिष्टयजूंषि' इति
यत्, तत् 'देवताना' 'अवसग' विसर्जनम्। 'अवभृथ' इति
यत्, तत् 'सस्था' कर्मसमाप्ति । अत कर्मोपक्रमे एव देवता
विसर्जन कर्मसमापन च कर्तु न युक्त मित्यर्थ ।

तन्मत निरस्यति— "स वै स मेव स्थापयेदिति। पूर्व 'प्रजा-
पतिरेतेन पशुना इष्ट्वा' 'अपश्यद्' विचारितवान्,— 'यथा' येन
प्रकारेण एतस्य' अग्ने' 'अन्त' 'न 'पर्यैत्' पर्यगच्छत्, चिकीर्ष-
माण स स्वय मेव तदपश्यत् इत्यन्वय। यद्येकेनैव पशु
नेष्टाग्नेरन्त परिगच्छेत्, तर्हि समिष्टयजुरादिक न कर्त्तव्य
स्यात्, न तथा, एकेन पशुना यागेऽपि इष्टेष्टा पशुशरी-
राणा मप्सु प्रासनात् तत्परिमाणमृत्मयीष्टकोपधानादिक
विना अन्त्यन्तगमनाभावसिद्धे पशुकर्म सस्थापयितव्य मित्य
भिप्राय ।

सस्थापनाकरणे अनिष्ट दर्शयितु मनुवदति— "यद्वैव
सस्थापयति प्राण एष पशुरिति। पशो प्राणत्व पुरस्तादुक्तम्।
'तस्य' पशो सम्बन्धि 'यत्' कर्म 'अन्तरियात्' व्यवहित कुर्यात्,
'प्राणस्य' सम्बन्धिन मेकदेश मेव व्यवहित कृतवान् भवति।
'तत' च प्राणाद्व्यन्तरित स अनन्तर मेव 'म्रियेत' मृतो
भवति, 'तस्मात्' पशुकर्म 'सस्थापयेदेव' इत्यर्थ ॥

---

* पुरस्ताद् द्रष्टव्यम् (१ ब्रा० ७ क० ५४ ६८ पृ० । का० श्रौ०
सू० १६ १ १५–२१) ।

अथ पशुयागानन्तरं चयनकर्मणि यजमानकर्त्तव्यानां नियमानां मीमांसा वक्ष्यत इति प्रतिजानीते – "अथातो व्रतानामेवेति ॥ ३८ ॥

कर्त्तव्याकर्त्तव्यविचारं पूर्वोत्तरपक्षाभ्यां निरूपयति—"तद्धु नैतेनेति। 'पशु' नाम 'पूर्वा' प्रथमभाविनी 'दीक्षा', दीक्षाकर्मोपक्रमार्थं मिति मत्वा पूर्वपक्षोऽयं। 'अत' पशुकर्मणो दीक्षात्वात् यजमानस्योपरि शयनादिकम् 'अनवक्लृप्तम्' अयुक्त मित्यर्थः। दूषयति— "नेत्त्वेवैषा दीक्षेति। अत्र दीक्षाशब्दस्य मुख्यार्थस्वीकारः। मुख्यदीक्षायां "मेखलया दीक्षयति"–"कृष्णाजिनेन दीक्षयति"–इति *, मेखलाजिनयोरत्राभावात् इयं दीक्षा न भवतीत्यर्थः। किं तत् पश्वनुष्ठान मिति, तत्राह — "इष्टका वा एता कुरुत इति। पशुयागो नामेष्टकाकारण मेव। 'तस्मात्' मांसोपयोगमने 'काम' कुर्यात्। "एतद्धु सर्वं मन्न मिति। पुरुषादिपशूनां सर्वान्नत्वात्। 'तद्' 'यदा' 'आगम्' 'आरब्ध' प्रक्रान्तं भवति, तस्मात् 'आ मधुन' मर्यादायां माङ्, मधुपर्यन्तम् 'यानि' 'अशनानि' अन्नानि, 'तेषां' मध्ये 'अस्य' यत् 'कामाशनम्' इच्छया भोजनम्। किं सर्वदा ? नेत्याह— "यदि न लभेतेति †। 'यदि' हि अत्र 'न' 'लभेत' लब्धं भवेत्, तर्हीत्यर्थः। एकं नियम माह— "मिथुनं तु नोपेयादिति ‡। मिथुनवर्जनं सर्वथा कार्यं

---

* तै० सं ६ १ ३ १४ ४ प्रभृतिकं द्रष्टव्यम्।

† 'यदि लभेत"—इत्येव सर्वमूलपुस्तकपाठः।

‡ अहनि मांसमैथुने वर्जयेत"—इति का० श्रौ० सू० २ १ ८। 'अहनि, अस्मिन् प्रक्रान्ते व्रतेऽहनि'—इति तत्र तट्टीकाकारः।

मित्येतत् प्राप्तम्, तस्यावधिं दर्शयति— "पुरा मैत्रावरुण्यै पयस्याया इति। पञ्चम्यर्थे चतुर्थी। आमिक्षायागपर्यन्तम्। अत कात्यायन— "मैथुनं वर्जयेदा पयस्यायाः, मांसो पर्यासने चेच्छन्"-इति *।

तस्य नियमस्य विधायकं ब्राह्मण मतिदिशति— "तस्योपरि बन्धुरिति। 'उपरि' उत्तरत्र नवमकाण्डे "अथ मैत्रावरुण्या पयस्यया यजते"-इति † मैत्रावरुणी पयस्या विधाय आम्नातम्— "स यन्नेतयानिष्ट्वा मानुष्यां चरेत् प्रत्यवरोह स यथा देव सन् मानुष स्यात् तादृक् तत्"-इति ‡ ॥ ३८ ॥

अस्मिन् यज्ञे ब्रह्मसम्प्रदायक दक्षिणादान पूर्वोत्तरपक्षाभ्यां निषेधयति— "तदाहुर्दद्यादेतस्मिन् यज्ञे दक्षिणा मिति। 'ब्रह्मण' 'आदिष्टदक्षिणाम्' प्रतिनियतदक्षिणाम्। 'भिषज्यित' चिकित्सित। भिषज् शब्दात् कण्ड्वादिभ्यो यक्, तदन्तात् कर्मणि क्त, इडागम। "इष्टका वा एता मिति। पशुयागो नामेष्टकाकरणम्, तस्मात् प्रतीष्टक दक्षिणादानसमानम्, पशुयागे दक्षिणादान मित्यर्थ। पशौ देयाया दक्षिणाया काल दर्शयति— "अमुष्मैव दद्यादिति। 'अमुहि' अद शब्दो विप्रकृष्टवचन। चयनकर्मणो दक्षिणादानकाले 'अस्य' ब्रह्मणो

---

* का० श्रौ० सू० १६ १ २८, २६। "पयस्या मैत्रावरुणी, तस्यैव दोहन शृते वा दध्यानयति'—इति, मित्रावरुणाभ्यां पयस्याम्" —इत्यादि च द्रष्टव्यम् (४ ४ ७ ८, ६ १ १६। पञ्चम हवि)।

†, ‡ ६ का० ५ अ० १ ब्रा० ५४ क० द्रष्टव्यम्। 'अग्ने व्रतपतये व्रतेऽहनि मैथुनमांसभोजनं चेत"-इति च तत्र प्रायश्चित्त सूचितम (२५ ४ २७)।

'यद्' देयम् 'उपकल्पेत' यत्कल्पितं स्यात्, तदा तद् देय मित्यर्थः ॥ ४० ॥ १ [२ २] ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
षष्ठे काण्डे द्वितीयेऽध्याये द्वितीय ब्राह्मणम् ॥

(अथ तृतीय ब्राह्मणम्)

एतद्वै देवा अब्रुवन् । चेतयध्व मिति चिति मिच्छतेति वाव तदब्रुवस्तेषा चेतयमानाना प्रजापतिरिमा प्रथमाᳫं स्वयमातृण्णा चिति मपश्यत् तस्मात्ता प्रजापतिनोपदधाति ॥ १ ॥

त मग्निरब्रवीत् । उपाहमायानीति केनेति पशुभिरिति तथेति पश्विष्टकया ह तदुवाचैषा वाव पश्विष्टका यद्दूर्वेष्टका तस्मात् प्रथमायै स्वयमातृण्णायाः ऽअनन्तर्हिता दूर्वेष्टकोपधीयते तस्मादस्या ऽअनन्तर्हिता ओषधयो ऽनन्तर्हिता' पशवो ऽनन्तर्हितोऽग्निरनन्तर्हितो ह्येष एतयो-पैत् * ॥ २ ॥

* 'एतयोपैत्'—इति ग, घ। 'एतयोपेत'—इति क।

ते ऽब्रुवन् । चेतयध्व मेवेति चिति मिच्छ-तेति वाव तदब्रुवन्नित ऊर्द्ध मिच्छतेति तेषा चेतयमानाना मिन्द्राग्नी च विश्वकर्मा चान्त-रिक्ष द्वितीयाᳪ स्वयमातृण्णा चिति मपश्य-स्तस्मात् ता मिन्द्राग्निभ्या च विश्वकर्मणा चोप-दधाति ॥ ३ ॥

तान् वायुरब्रवीत् । उपाह मायानीति केनेति दिग्भिरिति तथेति दिश्याभिर्ह तदुवाच तस्माद् द्वितीयायै स्वयमातृण्णाया ऽअनन्तर्हिता दिश्या उपधीयन्ते तस्मादन्तरिक्षादनन्तर्हिता दिशोऽनन्त-र्हितो वायुरनन्तर्हितो ह्येष एताभिरुपैत् * ॥ ४ ॥

ते ऽब्रुवन् । चेतयध्व † मेवेति चिति मिच्छतेति वाव तदब्रुवन्नित ऊर्द्ध मिच्छतेति तेषा चेतय-मानाना परमेष्ठी दिव तृतीयाᳪ स्वयमातृ-ण्णां चिति मपश्यत् तस्मात् ता परमेष्ठिनोपदधा-ति ॥ ५ ॥

---

* 'एताभिरुपात्'—इति ग, घ ।

† 'तेऽब्रुवश्चेतयध्व'—इति क, ख ।

स मसावादित्योऽब्रवीत् । उपाह मायानीति केनेति लोकम्पृणयेति तथेत्येष वाव लोकम्पृणा-त्मना हैव तदुवाच तस्मात्तृतीया स्वयमातृण्णा-नन्तर्हितालोकम्पृणाया ऽउपधीयते तस्मादसावा-दित्योऽनन्तर्हितो दिवोऽनन्तर्हितो ह्येष एत-योपैत् * ॥ ६ ॥

तदेता वाव षड् देवता । इदꣳ सर्व्व मभवन् यदिदं किञ्च ते देवास्तऽर्षयश्चाब्रुवन्निमा वाव षड् देवता । इदꣳ सर्व्व मभूननुप तज्जा-नीत यथा व्वय मिहाप्यसामेति तेऽब्रुवश्चेतयध्व मिति चिति मिच्छतेति व्वाव तदब्रुवस्तदिच्छत यथा व्वय मिहाप्यसामेति तेषा चेतयमानाना देवा द्वितीया चिति मपश्यन्नृषयस्चतुर्थीम् † ॥ ७ ॥

तेऽब्रुवन् । उप व्वय मायामेति केनेति यदेषु लोकेषूपेति तथेति तद्यदूर्ध्वं पृथिव्या अर्वाचीन मन्तरिक्षात्तेन देवा उपायस्तदेषा द्वितीया चिति-

---

* 'एतयोपेत्'—इति ग, घ। 'एतयोपेत—इति ङ।

† '०श्चतुर्थीम्'—इति ग, घ। 'श्चतुर्थीम्'—इति ङ।

रथ यदूर्ध्वं मन्तरिक्षादर्वाचीनं दिवस्तेनऽर्षय उपायं-स्तदेषा चतुर्थी चिति: ॥ ८ ॥

ते यदब्रुवन्। चेतयध्व मिति चितिं मिच्छतेति वाव तदब्रुवन् यच्चेतयमाना अपश्यंस्तस्मा-च्चितय: ॥ ९ ॥

प्रजापति: प्रथमां चिति मपश्यत्। प्रजा-पतिरेव तस्या आर्षेय देवा द्वितीयां चिति मप-श्यन् देवा एव तस्या आर्षेय मिन्द्राग्नी च विश्व-कर्मा च तृतीयां चिति मपश्यस्त ऽएव तस्या आ-र्षेय मृषयश्चतुर्थीं चिति मपश्यन्नृषय एव तस्या आर्षेय परमेष्ठी पञ्चमीं चिति मपश्यत् परमेष्ठ्येव तस्या आर्षेयं स यो हैतदेवं चितीना मार्षेयं वेदार्षेयवत्यो हास्य बन्धुमत्यश्चितयो भवन्ति ॥ १० ॥ २ ॥

॥ इति द्वितीयप्रपाठके द्वितीयं ब्राह्मणम् [२. ३] ॥

उत्तरत्रोपधास्यमानानां चितीनां ऋषिदेवतासम्बन्धेनोत्पत्ति-प्रकार, तत्सङ्ख्याविशेष:, स्वयमातृण्णेष्टकानां स्थानविशेष-प्रदर्शनञ्च तृतीये ब्राह्मणे प्रतिपाद्यते। स्वयमातृण्णेष्टकाश्चितस्रो

भूम्यन्तरिक्षद्युलोकात्मिका । अत एव प्रथममध्यमोत्तमासु चितिषूपधेया ।

तत्र प्रथमायाश्चितेरुपपत्तिं दर्शयति— "एतद्वै देवा अब्रुवन्निति । 'एतद्' वक्ष्यमाण मर्थजातम् अवोचत् । तदाह— "चेतयध्व मितीति । स्वय मेवैतस्य पदस्यार्थं माह— "चितिमिच्छतेतीति । चेतयध्व मित्येतेन चितिमिच्छते वाव तदब्रुवन्निति । 'तेषां' 'चेतयमानानां' चितिमिच्छतां देवानां मध्ये प्रजापतिः 'इमां' भूमिरूपां प्रथमां 'स्वयमातृण्णां' स्वय मेव मध्ये छिद्रां शिलारूपा मिष्टकां 'चितिम्' 'अपश्यत्' । यस्मात् प्रजापतिरपश्यत्, 'तस्मात्' 'ताम्' इष्टकां 'प्रजापतिना' "प्रजापतिष्ट्वा सादयतु"–इत्यादिना * प्राजापत्यमन्त्रेण 'उपदधाति' ॥ १ ॥

तस्मिन् मन्त्रे † "अग्निष्ट्वाभिपातु'–इत्यग्निसम्बन्धः श्रूयते, त मपि दर्शयति— "त मग्निरब्रवीदिति । 'तम्' इष्टकाकारं प्रजापतिम् अग्निम् 'अग्नि' 'अहं' स्वयम् 'उपायानि' आगच्छानि 'इति' 'अब्रवीत्' । 'केन'–इत्यादिनी प्रश्नोत्तरे प्रजापत्यग्न्योः, 'तथा'–इति प्रजापतिरङ्गीकारोक्तिः । 'पशुभिः'–इति यदग्नि-

* वा० स० १३ १४—१६ ।

† 'तस्मिन् चतुर्थे वर्गे'–इति वक्तव्यम्, "अग्निष्ट्वाभिपातु'—इत्यस्य तत्तृतीये मन्त्रे समाम्नानश्रुतेः । वस्तुतो हि ध्रुवासीत्यादीनां चतुर्णां मेव मन्त्राणां तत्र विधानम् । तथाहि— "स्वयमातृण्णां पुरुषे पुष्करां छिद्रां ध्रुवासीति'–इति का० श्रौ० सू० १७ ४ १५ । तदेव स्वयमातृण्णोपधानमन्त्राणां प्रथमो ध्रुवासीति द्वितीयः प्रजापतिष्ट्वेति, तृतीयो भूरसीति, चतुर्थो विश्वस्मा इति, तस्यैवोत्तरार्द्धे च श्रुतम् अग्निष्ट्वाभिपात्विति ।

गोक्तम्, तदु विवृणोति— "पञ्चिष्टकाया ह तदुवाचेति। पञ्चिष्टकास्वरूप माह— "यदु दूर्वेष्टकेति। दूर्वेष्टकया सहाग्नि- रत्र माधानीत्यर्थं सिद्धो भवति। यस्मादेतया अग्निरनन्त- र्हित उपागच्छत्, 'तस्मात्' प्रथम स्वयमातृण्णेष्टकोपधानान- न्तर मेव 'दूर्वेष्टकोपधीयते'। तदिद प्रशंसति— "तस्मादस्या अनन्तर्हिता ओषधय इति। 'अस्या' भूमे 'ओषधय' अन- न्तर मेवोत्पन्ना, दूर्वाणा मोषधित्वात्। पशूना दूर्वात्वात् दूर्वेष्टकया 'पशव' अपि 'अनन्तर्हिता' उपहिता भवन्तीति। अत एव स्वयमातृण्णोपधानानन्तर दूर्वेष्टकोपधानम्।

तदुपधानमन्त्रद्वय च सप्तमे काण्डे समाम्नास्यते— "स्वय- मातृण्णा मुपदधाति"–इत्युपक्रम्य *, "ता वै प्रजापतिर्गोप- दधाति" †, "अथ दूर्वेष्टका मुपदधाति" ‡, "काण्डात्का- ण्डात् प्ररोहन्तीति"–इति §। प्रथम स्वयमातृण्णोपधानमन्त्रे प्रजापत्यभिसम्बन्ध, तस्या भूमिरूपत्व चोक्तम्— "प्रजापति- स्त्वासादयत्वपाम्पृष्ठे"–इत्युपक्रम्य ‖ "भूरसि भूमिरस्यदितिरसि" –इति ¶ मध्ये, "अग्निष्टाभिपातु मह्या स्वस्त्या **"–इति चान्त इति ॥ २ ॥

* ७ का० ४ अ० २ ब्रा० १ क० ।

† ७ का० ४ अ० ३ ब्रा० ५ क० ।

‡ ७ का० ४ अ० २ ब्रा० १० क० ।

§ ७ का० ४ अ० २ ब्रा० १४ क० । 'काण्डात्काण्डात्"–इति वा० स १३ २०। "मूलाग्रवर्ती दूर्वा तस्यां पुरस्तात भूमि प्राप्तां काण्डात काण्डादिति"–इति चात्र का० श्रौ० सू० १७ ४ १८ ।

‖ ७ का० ४ अ० २ ब्रा० ६ क० ।

¶ वा० स० १३ १८ । ** वा० स० १३ १६ ।

अथ द्वितीयस्वयमातृण्णेष्टकाप्रधानाया तृतीयचितेरुत्पत्तिं दर्शयति— "तेऽब्रुवन्निति। पूर्ववद् व्याख्येयम्। चितिं मिच्छतेति यदुक्तम्, तत्तात्पर्यं दर्शयति— "इत ऊर्ध्वं मिच्छतेति। 'इत' पञ्चमुष्ठानाद् 'ऊर्ध्वं' चितिम् 'इच्छत' इत्यर्थः। 'इन्द्राग्नी च विश्वकर्मा च' अन्तरिक्षरूपा 'द्वितीया' स्वयमातृण्णेष्टकाम् 'अपश्यन्'। 'तस्मात्' 'ताम्' इष्टकाम् इन्द्राग्निदेवत्यमन्त्रेण *, विश्वकर्मदेवत्यमन्त्रेण † चोपदध्यात् ॥ ३ ॥

तन्मन्त्रे च "वायुष्ट्वाभिपातु"–इति ‡ वायुसम्बन्धः श्रूयते, त माह— "तान् वायुरब्रवीदुपाह मिति। 'तान्' इन्द्राग्नी विश्वकर्माणश्च। 'केन'–इत्यादिनौ प्रश्नोत्तरे पूर्ववत्। "दिश्याभि-रिति। यदिन्द्राग्निभ्यां विश्वकर्मणा चोक्तम्, तद् विहणोति— दिश्याभिर्ह तदुवाचेति। दिशि भवा दिश्या इष्टका, ताभि रगच्छानीत्युक्तवान्। "दिगादिभ्यो यत्"-इति § दिक्शब्दात् यत् प्रत्ययः। 'तस्मात्' द्वितीयस्वयमातृण्णोपधानानन्तरम्, दिश्येष्टकोपधानम् ‖। तदुपधानमन्त्रद्वयञ्चाष्टमे काण्डे प्रदर्शयिष्यते ¶। तन्मन्त्रे प्रथम मिन्द्राग्निविश्वकर्मसम्बन्धः, मध्ये अस्या अन्तरिक्षरूपत्वम्, अन्ते वायुसम्बन्ध इति ** ॥ ४ ॥

---

* वा० सं० १४ ११।

† वा० सं० १४ १२।

‡ वा० सं० १४ १२ उत्तरार्द्धं द्रष्टव्य.।

§ पा० सू० ४ ३ ५४।

‖ का० श्रौ० सू० १७. ६. १, २, ३।

¶ ८का० ३ अ० १ब्रा० १२, १३ १४।

** वा० सं० १४ १३, १४।

अथ तृतीयस्वयमातृण्णाप्रधानायाः पञ्चमचितेरुत्पत्तिं दर्श-यति—"तेऽब्रुवन्नित्यादि। पूर्ववत्। 'परमेष्ठी' 'दिवं' द्युलो-कात्मिकां 'तृतीयां' 'स्वयमातृण्णाम्' इष्टकाम् 'अपश्यन्'। 'तस्मात्' 'ताम्' इष्टकाम् 'परमेष्ठिना' "परमेष्ठी त्वा सादयतु" -इति मन्त्रेण * उपदध्यात् † ॥ ५ ॥

तस्मिन् मन्त्रे सूर्यस्त्वाभिपातु"–इति सूर्यसम्बन्धः श्रूयते ‡, तं दर्शयति— "त मसावादित्योऽब्रवीदिति। "लोकम्पृणये-तीति। एतन्नामधेयेष्टकया। लोकम्पृणयेति यदादित्येनोक्तम्, तद् विवृणोति— "आत्मना हैव तदुवाचेति। तस्या तृती-याया स्वयमातृण्णेष्टकाया लोकम्पृणायाश्च पौर्वापर्येण उपधान मुत्तरत्र वक्ष्यते। तन्मन्त्रे § पूर्ववदादिमध्यान्तेषु परमेष्ठिसम्बन्ध, द्युलोकरूपत्वम्, सूर्यसम्बन्धश्च विद्यते ‖ ॥ ६ ॥

इत्थं प्रथममध्यमोत्तमास्तिस्रश्चितय ऋषिदेवतासम्बन्धित्वेन दर्शिता, इतः परं द्वितीयचतुर्थ्योश्चित्योरुत्पत्तिप्रकारं वक्तु उक्तचितित्रये ऋषिदेवता परिगणयति— "तदेता वाव षड् देवता इति। प्रजापतीन्द्राग्निविश्वकर्मपरमेष्ठिनस्त्रय ऋषय, अग्निवायुसूर्यास्तिस्रो देवता, इति षड् देवता इत्युक्तम्। इन्द्राग्न्योर्विश्वकर्मणश्च सहैव चितिद्रष्टृत्वेनैका देवतेति परिगण-नया षट् देवता भवन्तीत्यर्थ। लोकानां भूम्यादीनां त्रित्वात्,

* वा० स १५ ६४। † का० श्रौ० सू० १७ १२ २६।
‡ का० श्रौ० १७ १२ २४ सूत्रेऽपि विहित. परमेष्ठीति मन्त्र (वा० स० १५ ५८), तस्मिन् नास्ति सूर्यसम्बन्ध इति चात्र ध्येयम्।
§ वा० स० १२ ५४—५६=१५ ५६—६१।
‖ का० श्रौ० सू० १७. १ १७, पुनस्तत्रैव १९. २५।

तदभिमानिना मन्वादीनाञ्च त्रित्वात्, एतेषु सर्वसङ्ग्रहाभि-
प्रायेण "इद सर्व मभवन् यदिद किञ्च"–इत्युक्तम्। "ते
देवा ऋषय इति। उक्तव्यतिरिक्ता 'ऋषयो देवाश्च' परस्परम्
'अब्रुवन्'। उक्तिप्रकार दर्शयति— "इमा वाव षड् देवता
इति। प्रजापत्यादय एव षड् देवता 'सर्वम्' अभूवन्,
'वयम् अपि' देवा ऋषयश्च 'इह' अस्मिन् चयनकर्मणि 'यथा'
येन प्रकारेण 'असाम' भवेम। अस्तेर्लोटि रूपम्। चयन-
मध्ये भवनम् 'उपजानीत' अन्योन्य विचारयतेति अन्ये देव-
र्षयोऽवोचन् ॥

'तेऽब्रुवन्नित्यादिना द्वितीयचतुर्थ्योश्चित्योरुत्पत्तिरुक्ता। प्रथम-
स्वयमातृण्णाचितेरनन्तर देवदृष्टा द्वितीया चिति, द्वितीयस्वय-
मातृण्णानन्तर मृषिदृष्टा चतुर्थी चिति, एव पञ्च चितय
सम्पन्ना इत्यर्थ ॥ ७ ॥

"तेऽब्रुवन्नुपेति। "तद् यदूर्ध्व पृथिव्या इति। 'पृथिव्या'
भूलोकाद् 'ऊर्ध्वम्' 'अन्तरिक्षादर्वाचीन' 'यत्' पदार्थजात मस्ति,
'तेन' सह 'देवा' द्वितीया चितिम् उपागच्छन्। 'अन्तरिक्षात्
ऊर्ध्वम्' 'दिव' द्युलोकात् 'अर्वाचीनम्' 'यद्' वस्तुजात मस्ति,
'तेन' सह 'ऋषय' चतुर्थीं चिति मपश्यन्नित्यर्थ ॥ ८ ॥

चितिशब्द निर्वक्ति— "ते यदब्रुवन्निति। यस्मात् तेषु
चोक्ता प्रजापत्यादय सर्वेऽपि 'चेतयध्व मिति' उक्त्वा चितिं
दृष्टवन्त, 'तस्मात्' चितिससर्गात् चितिशब्दो निरुक्त। "चिति
सञ्ज्ञाने" *, क्तिनि धातुतकारलोपे कृते रूप मिति मन्तव्यम्।
यद्वा "चिञ् चयने"–इति † अस्य क्तिनि रूपम् ॥ ९ ॥

---

* भ्वा० प० ३९ धा०।　　† स्वा० उ० ५ धा०।

उक्तानां स्वयमातृण्णादीनां पञ्चानां चितीनां * प्रजापत्यादयोऽग्न्यादयश्च ऋषयो देवाश्चोक्ता , तत्र ऋषीनेव सुखप्रतिपत्तये दर्शयति— "प्रजापति प्रथमां चिति मपश्यदिति । "प्रजापतिरेव तस्यार्षेय मिति । एवकारोऽन्यनिवृत्त्यर्थं । 'तस्या ' प्रथमायाश्चिते 'आर्षेयम्' । ऋषिरेवार्षेयम् , स्वार्थिको ढक् प्रत्यय ।

चितीना मृषिविदुष फल माह— "स यो हैतदेव मिति । 'अस्य' वेदितु 'चितय ' 'आर्षेयवत्य ' ऋषिसम्बद्धा , 'बन्धुमत्य ' विधायकब्राह्मणानूदिता । वेदनमात्रेण ऋषिदृष्टा ब्राह्मणविहिताश्चितयोऽनुष्ठिता 'भवन्ति' इत्यर्थं. ॥ १० ॥ २ [२ २] ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
षष्ठकाण्डे प्रथमेऽध्याये तृतीय ब्राह्मणम् ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वर ॥ १ ॥

ब्रह्माण्ड गोसहस्र कनकहयतुलापूरुषौ स्वर्णगर्भम् ,
सप्ताब्धीन् पञ्चसीरीं स्त्रिदशतरुलताधेनुसौवर्णभूमी ।
रत्नोस्रा हस्तिवाजिद्विपसहितरथौ सायणि स्त्रिङ्गणार्यौ ,
व्यश्राणीद्विश्वचक्रं प्रथितविधिमहाभूतयुक्त घटञ्च ॥

---

* तै० सं० ५ ६ १० द्रष्टव्यम् ।